
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

4569

॥वाक्यार्थदीपिकाख्याचिंतामणिटीका॥
॥श्रीमते मेधादक्षिणामूर्त्तये गुरवे नमः॥ ॥ मू२

(१)

१

श्रीहागल्लूरहनुमते नमः॥ गणेशाय नमः॥ प्रणम्य सीतापतिपादपंकजं घनच्छ
वि श्रीहनुमत्कवित्वसौ सुनंदरामाख्यदयावन्तुं वदः करोति वाक्यार्थसुदीपिकां म
णेः॥१॥ काश्यपान्वयाब्धिपूर्णशारदेंदुमंडलं व्यासवर्यनामकं च तातपादमादरा
त् पंडितप्रगीयमानमानसारपारगं वीरराघवाभिधं ननुस्तुमस्सदा गुरुं २ भूयः प्रण
म्य विदुषो विहितांजलिस्तद्दूष्यवचो न च मम मतिनिवेदयामि प्राचां निबंधगतमत्र विलिख्यते यत्ना
यस्तदल्पबहुकल्पगिरानिरुद्धं ३ पूर्वोत्तरग्रंथयोरेकप्रयोजनहेतुप्रतिपत्तिकत्वरूपैकवाक्य
ताप्रतिपत्तये उन्मत्तप्रल[illegible]पितत्वशंकानिरासाय संगतिं प्रदर्शयन् शिष्यावधानाय प्रति
जानीते प्रत्यक्षोपजीवकत्वादित्यादिना अत्र पंचम्यर्थः प्रत्यक्षानंतरनिरूपणान्वयी ज्ञान
जन्यजिज्ञासाप्रयोज्यत्वं प्रत्यक्षानंतरं तन्निरूपणानंतरं उपमानात्माकं तन्निरूपणात्माकं निरू

१

(2)

प्यते लक्षणादिभिर्ज्ञाप्यत इत्यर्थः अत्र प्रत्यक्षपदस्योभयत्र प्रयोगात्प्रत्यक्षप्रमितितत्करणपरत्व
मनुमानपदस्य च भावकरणव्युत्पत्तिभ्यामनुमितितत्करणपरत्वं बोध्यं आनंतर्यं च तन्निरूपण
ध्वंसाधिकरणकालवृत्तित्वं ननु संगतिप्रदर्शनस्यैकवाक्यतानुमितिः फलं अनुमानाकारश्चानु
मानोपमानेस्मस्य पूर्वग्रंथप्रयोजनहेतुप्रतिपत्तिके सस्वपूर्वनिरूपितसंगतिमत्त्वादिति एवंविधानुमाने
नैव चरितार्थत्वादनुमानानंतरकल्पने गौरवाच्चा नैवानुमानोपमान संगतिप्रदर्शनमुचितमिति शं
कायां तत्रैवाह बहुवादीति अत्र पंचम्याः ज्ञानप्रयोज्यप्राथमिकजिज्ञासाप्रयोज्यत्वमर्थः अनुयश्चा
स्योपमानप्राङ्निरूपण इति बोध्यं ननु सप्रसंग उपोद्घातो हेतुतावसरस्तथा निर्वाहकैककार्यत्वे षो
ढा संगतिरिष्यत इत्यनेन परिगणितानां षड्विध संगतीनामनंतः पातिनोऽनुमानगतस्य बहुवादिसं
मतत्वस्य कथं संगतित्वमिति चेन्न तेनावसरस्यैव सूचनात् तथाहि अनुमानस्य बहुवादिसंमतत्वे

क

२ योपमानस्यबहुवादिसंमतत्वमुक्तं एवंचताभ्याम नुमानोपमानयोर्निरसनीया ऽस्मवादिविप्रतिपत्ति
कत्वनिरसनीयबहुवादिविप्रतिपत्तिकत्वप्रतीत्यासुप्रतिपदत्व दुरूहत्वयोर्ज्ञानं जायते तथाचप्रसिद्धार्थ
स्यबहुपयोगात्तत्रैवेष्टसाधनताज्ञानेनौत्सर्गिकः प्रथमं जिज्ञासोत्पद्यते नत्वप्रसिद्धार्थज्ञाने तस्यबह्वा
यासानुबंधित्वेनानिष्टसाधनताज्ञानोदयादित्यनुमानेप्रथमंप्रतिबंधकीभूतशिष्यजिज्ञासोत्पत्तौ
तन्निरूपणेचतन्निवृत्तेरवसरइति तथाचप्रत्यक्षप्रमित्युपजीवकत्वज्ञानजन्यजिज्ञासाप्रयोज्यप्र
त्यक्षप्रमितिनिरूपणध्वंसाधिकरणकालवृत्तिबहुवादिसंमतत्वज्ञानप्रयोज्यप्राथमिकजिज्ञासाप्रयो
ज्योपमितिनिरूपणप्रागभावकालवृत्तित्वलक्षणादिप्रकारकवर्तमाननिरूपणविषयोऽनुमितिरितिस
मुदितार्थः एवं प्रमितिपदस्थानेकरणपदंप्रक्षिप्यवाक्यार्थोबोध्यः तेननग्रंथकारस्यन्यूनता अधिकंत्वन्य
त्रानुसंधेयं मिश्रानुयायिनस्तुप्रत्यक्षोपजीवकत्वादित्यारभ्योप मानात्प्रागित्यंतःपाठःकाल्पनिकः २

न तु वास्तविकः अथानुमानं निरूप्यत इत्येव पाठो वास्तविकः तावतैव सिद्धसाध्यसमभिव्याहारेत्यादिन्या
येनोपजीवकत्वस्य प्रतिबंधकीभूतजिज्ञासानिवर्तसिद्धकथनेनावसरस्य च लाभसंभवात् अन्यथा त्व
वखंडेप्युपमानोपजीवकत्वादुपमानानंतरं शब्दो निरूप्यत इत्यस्य वक्तव्यत्वापातादित्याहुः अन्यरूपांतरेण
संगतिप्रदर्शनास्यानुपयुक्तत्वात्संगतित्वेन संगतिप्रदर्शनमावश्यकं तत्वं चानंतराभिधानप्रयोजकजिज्ञा
साजनकज्ञानविषयत्वं तथा च तादृशज्ञाननियमाबलादनुमाने प्रत्यक्षोपजीवकत्वेन तस्य लाभेपि संगति
त्वेन न लाभः प्रत्यक्षोपजीवकत्वादिति पाठे पंचम्यर्थज्ञानजन्यजिज्ञासाप्रयोज्यत्वस्यानुमाननिरूपणनि
ष्ठस्य ज्ञाने तु न्यायवित्तुर्वेद्यत्वे योपजीवकत्वेप्यनंतराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वस्य लाभसं
भवति प्रकारांतरानुसरणे प्रयासगौरवं एवमुपमाननिरूपणात्पूर्वमनुमाननिरूपणे नियमकाभावः एव
मनुमानोपनयोरुपमाने संगतिप्रदर्शने गौरवाल्लाघवात्तत्रैव सा प्रदर्शनीया तत्प्रदर्शनं चाथानुमानं निरूप्य

३ तदित्यनेन न संभवति प्रतिबंधकीभूतशिष्यजिज्ञासानिवर्तकप्रत्यक्षरूपसिद्धकथनेन तज्जिज्ञासानिवृत्तावश्य
वक्तव्यत्वस्यानुमाने एवसत्वात् इदानीमनुमानस्यसिद्धत्वात् इच्छाया नियामकत्वेनानन्यगतिकत्वस्त्वेवो
पेयत इति द्रष्टव्यं तन्नेति कर्तव्यनिरूपकानुमानलक्षणेन तत्पदार्थः सप्तम्यर्थश्च घटकत्वं कर्तव्यलक्षणादि
प्रकारकानुमाननिरूपणं वा तत्पदार्थः विशेष्यत्वं च सप्तम्यर्थः अनुमितिरित्यनेनास्यान्वयः तथा च कर्तव्यनि
रूपणकानुमाने घटकीभूता कर्तव्यलक्षणप्रकारकानुमाननिरूपणे विशेषणीभूता वानुमितिर्व्याप्तिविशि
ष्टपक्षधर्मताज्ञानजन्यं ज्ञानमिति समुदायार्थः ननु प्रत्यक्षानंतरमनुमानं निरूप्यतामित्यनेन प्रत्यक्षापेक्ष
यानुमानस्य पृथक्प्रामाण्यमुपदर्शितं तच्च न संभवति करणानां क्रियावैलक्षण्याधीनवैलक्षण्यकत्वात् अन्यथा
पृथक्तन्निरूपणसंगतेरतः प्रथममेव क्रियावैलक्षण्यलाभाय तल्लक्षणमाह व्याप्तिविशिष्टेति व्याप्तिविशि
ष्टं तत्पक्षधर्मताज्ञानं चेति कर्मधारयः व्याप्तिविशिष्टं व्याप्तिप्रकारकं पक्षधर्मताज्ञानं पक्षहेत्वोस्संबंधाव ३

(६)

गाहिज्ञाने पर्वतो वन्हिमानित्यनुमितौ व्याप्तिप्रकारकपक्षधर्मताज्ञानात्मकवन्हिव्याप्यधूमवान् पर्वत इति
परामर्शजन्यत्वाल्लक्षणसमन्वयः अत्र व्याप्तिप्रकारकपक्षधर्मताविषयकनिश्चयत्वावच्छिन्नकारण
क तानिरूपिताभावविषयवृत्तिकार्यताश्रयवृत्त्यनुभवत्वव्याप्यजातिमत्वं तत्वमितिपर्यवसितलक्षणं बोध्यं
अत्र परामर्शस्य व्याप्तिघटकवन्ह्यादिविषयकतया वन्हिविषयकपरामर्शात्मकोपनयनजन्ये पर्वतो वन्हिमानि
सु त्युपनीतभाने परामर्षप्रत्यक्षे चातिव्याप्तिवारणाय तादृशज्ञाननिश्चयत्वावच्छिन्नकारणतायां निवेशः न
था च वन्ह्यादिज्ञानत्वेनैवोपनीतभानं प्रति विषयत्वेनैवं स्वप्रत्यक्षं प्रति हेतुतया परामर्शस्य नातिव्याप्तिः अभा
वाविषयकत्वनिवेशाद्व्याप्तिघटकीभूताभावविषयके विशेषणतावच्छेदकप्रकारकनिर्णयात्मकवन्हिव्याप्य
धूमवान्पर्वत इति परामर्षजन्येव वन्हिव्याप्यधूमवत्पर्वतवानयं देश इति विशिष्टवैशिष्ट्यबोधे नातिव्याप्तिः तादृशका ष्टवैशि॰ २
र्यताश्रयीभूत पर्वतो वन्हिमानित्यनुमितिवृत्तितादृशानुमितित्वरूपजातिमादायैव वन्हिव्याप्यधूमवान्पर्वतो

६ (निरुक्तयोगसत्त्वप्रकारान्तरेणाप्यनाम तमाह) १ तादृश[illegible] पादायप्रत्यक्षादावतिव्याप्तिवारणाय तद्याप्येति १

सनादिक

वह्निमानित्याद्यनुमितावपि लक्षणसमन्वयः अभेदेऽपि व्याप्यव्यापकभावस्वीकारात् तादृशानुभवत्वमादाय पुनः

प्रत्यक्षादावतिव्याप्तिवारणायानुभवत्वव्याप्येति अनुभवनिष्ठभेदप्रतियोगितावच्छेदकता[illegible]र्यकं

तेनानातिव्याप्तिः अन्यत्तु यद्यस्त्वमित्यन्यत्र विस्तरः तत्करणमिति तादृशजातिमत्करणमनुमानमि

त्यर्थः तथा च त्व[illegible]तावच्छेदकेऽनुमितित्वस्य स्वरूपत एव निवेशान्न्यौनरुक्त्यमिति भावः ननु व्याप्ति

ज्ञानत्वेन हेतुनाऽन्तरभेदानुमानसंभवेऽधिकवैय[illegible]मितिवाच्यं ध्वंसप्रागभावव्यभिभेदेनवैयर्थ्य

र्थ्यानवकाशात् अतुमानमनुमानपदवाच्यमितिवार्थः ननु ज्ञायमानं लिङ्गमनुमितिकरणं न चै

वमनुमितेर्ज्ञानाकरणकज्ञानत्वेन प्रत्यक्षत्वे तत्करणस्यापि तत्त्वापत्तिरितिवाच्यं अनुमितेरनुमिनो

मि न साक्षात्करोमीत्यनुव्यवसायबलेन प्रत्यक्षप्रमिवैजात्यसिद्धौ तत्करणस्यापि तत्करणतावैजात्य

संभवात् केचित्तु ज्ञानस्यापि ज्ञायमानलिङ्गत्वसंभवेनानुमितेर्ज्ञानकरण[illegible]कज्ञानत्वाच्च करणानाप ४

१ (ननु ज्ञानाकरणकज्ञानकर[illegible]णत्वस्य प्रत्यक्षप्रमाणलक्षणत्वेन तस्यानुमानेऽतिव्याप्तिरत आह क्वचिदिति तथा च तन्मते अनुभव)

(त्वव्याप्यजातीयज्ञानत्वावच्छेदेन ज्ञानाकरणकत्वं तज्जातीयज्ञानकरणत्वस्यैव तल्लक्षणतया नानुमानेऽतिव्याप्तिरिति भावः) १

क्ष्य

र्थ्यं

४

(८)

(अदृष्टद्वारा) २

त्वाव्यभिचरितत्वव्यापारवत्वनियमेन लिंगे तदभावादसंभवं तस्याऽलक्ष्यत्वेन निरस्यति नचेति । लिंग
परामर्शः लिंगविशेष्यकव्याप्तिज्ञानं दीधितिकृतस्तु ननु प्रत्यक्षोपजीवकत्वादनुमाने निरूप्यत इत्य
संगतं ज्ञापमानलिंगस्यानुमितिकरणतया तस्य प्रत्यक्षोपजीवकत्वाभावात् जन्यलिंगस्य कथं
चित्प्रत्यक्षोपजीवकत्वेपि नित्यलिंगस्य तथात्वासंभवात् अनुमानत्वावच्छेदेन तदुपजीवकत्वस्या
पेक्षितत्वादनुमानसामान्यस्यैव निरू[illegible]णीयत्वादित्याशंकायामाह तच्चेतीति प्राहुः ननु प्रत्य
क्षोपजीवकत्वादनुमाने निरूप्यत इति वाक्यस्य लिंगज्ञान एव तात्पर्यं ज्ञायते ननु लिंगेन तेनैवं कथं नि
श्चय इति चेत् उपजीवकत्वादित्यनेनैव वर्त्यो हि लिंगस्य प्रत्यक्षानुपजीवकत्वात्तज्ज्ञानस्यैव तदुप वे २
जीवकत्वाच्च पुरस्कृतं चानुमानत्वावच्छेदेनैवोपजीवकत्वं स्वं च निरूपणीयलिंगज्ञानस्यैव लक्ष्यत
प्राप्त्या लिंगस्यात थात्वप्राप्तौ पुनरर्नेल्लक्ष्यत्वप्रदर्शनं पुनरुक्तमिति निबोध्यमेवं लिंगज्ञानस्य करणताया

२ (निरूपणोपयिकत्वेनापेक्षितमित्यर्थः) २

(सर्वत्रापि)३ =प्रत्यक्षप्रयोज्योमतिकत्वमित्यर्थः=२

मपि प्रत्यक्षोपजीवकत्वं हि न प्रत्यक्षकार्यत्वं अनुमितिकरणे अनुमितौ लिंगज्ञानेन तद्संभवात् नापि प्रत्य
जन्यजन्यत्वं अतींद्रियपक्षकातींद्रियसाध्यकातींद्रियलिंगकानुमानेन तदसंभवात् ननु प्रत्यक्षापेक्षोप
तिकत्वं तत् तथा च ताद्दशलिंगज्ञानोपजीवोपरंपरया कापि प्रत्यक्षापेक्षावर्तत एवेति चेन्न हि ताद्दशज्ञा
नविषयत्वमेव प्रत्यक्षोपजीवकत्वं ज्ञायमानलिंगकरणतायामपि सुवचमेव तथा च प्रत्यक्षोपजीवकत्वा
दित्यादिग्रंथेन ज्ञायमानलिंगस्यालक्ष्यताया ऽप्रामत्वान्तर्यौन रुक्त्वमित्यभिप्रायः वक्ष्यत इति परम
श्रेग्रंथे वक्ष्यत इत्यर्थः अनुमानस्य प्रामाण्यं व्यवस्थापयितुं चार्वाकमतमुपन्यस्यति अथेति अनुमाने॥
लिंगविशेष्यकज्ञाने अत्र पक्षतावच्छेदकं ताद्दशज्ञानत्वं तेनानुमितिकरणत्वस्य तत्वे आश्रयासिद्धिरिति निरस्तं
यद्वाऽनुमितिकरणत्वमेव पक्षतावच्छेदकमस्तु न चोक्तदोषः तन्मते हि पदानामलीक एव शक्तिः ननु पारमा
र्थिकि तत्र सदसतोः संबंधाभावेन पदप्रयोगनिमित्तीभूतानुगताकारासंस्पर्शात् अनुगताकारमात्रस्या

=मुख्यार्थरक्षणाय दीप्यति शास्त्रसिद्धं तमाहुर्यदेति= =यतः=२ =अनुगतधर्मस्यानुपगतत्वादेः=१

=तद्वृत्तिभेदरूपस्य=१ (इदं तु चिंत्यं अत्र प्रतितार्वैकल्पं पंचम्यं तस्यैवाकांक्षासत्वेन पंचम्यंतमेव पूरणीयमिति) ५

तद्व्यावृत्तिरूपस्यालीकत्वात् तथाचालीकस्यैवानुमितिकरणत्वावच्छिन्नस्यानुमानपदार्थतयाऽसत्ख्याति स्वीकर्तॄणां तेषां मते पक्षज्ञानसंभवेन नोक्तदोष इति ध्येयं नप्रमाणं प्रमितिकरणभिन्नं अत्राप्रमाणसाधर्म्येणेति समाधानस्यैव संबध्यते प्रमाणताप्रयोजकधर्मशून्यत्वादितितदर्थः तेन नम्रत्वरूतो हेतुकथनप्रयुक्तन्यूनतेति ध्येयं एतेन प्रमाणतावच्छेदकधर्मशून्यत्वादिति हेतुः पूरणीय इति वचनमसंगतमेवेति मंतव्यं ननु प्रमाणताप्रयोजको धर्मस्त्वन्मते इंद्रियत्वं मन्मते हेतुविशेष्यकव्याप्तिप्रकारकनिश्चयत्वमपि तच्च व्याप्तिज्ञानेऽस्तीति स्वरूपासिद्धोयं हेतुरित्यत आह योग्योपाधीनामिति इंधनादिस्वरूपयोग्यधर्माणां साध्यव्यापकत्वेनग्रहप्रमाणानामित्यर्थः व्यभिचारिता संबंधेन तादृशधर्मवत्वं यत्र तत्र सोपाधित्वं यत्र च तेन संबंधेन तदभावस्तत्र निरुपाधित्वमित्यत एव सामंजस्ये साधनाव्यापकत्वेन न निवेशनीयमित्यभिप्रायः योग्यानुपलब्ध्येति यद्यत्र हेतौ योग्योपाधिस्स्यात्तर्ह्युपलभ्येतेति प्रति

२ (ननु इंधनादीनां साधनाव्यापकत्वात् कथमुपाधित्वं कथं वा तदतिरेकनिश्चये नाधिव्याप्तिरेकिनिश्चय इत्यत आह व्यभि इति)

म

२ हेत्वभावनिश्चयेपीत्यर्थः॥ अयोग्योपाधिशंकयेति॥ वाय्वादिस्वरूपायोग्यधर्माणां साध्यव्यापकत्वेन गृह्यमाणानां तेन संबंधेन २

१ (तदधिकरणे तदभावप्रत्यक्षेण तदधिकरणतद्विशिष्टावगाहनवच्छिन्नप्रतियोगिसत्त्वनिष्ठव्याप्तिनिरूपकप्रतियोगि प्रकारकोपलंभाभावस्य कारणत्वादिति भावः) १

६ योगिसत्त्वव्यापकोपलंभस्य विषयतासंबंधावच्छिन्नप्रतियोगिताकाभावेनेत्यर्थः अभावनिश्चयेपीति इत्थं
नत्वादिरूपेण तेन संबंधेन हेतौ शंकयेत्यर्थः इदं तु परमतामभिप्रायेण तेन चार्वाकेणातींद्रियपदार्थान
भ्युपगमेपि न क्षतिः व्यभिचारसंशयादिति सर्वत्र व्यभिचारसंशयसंभवादित्यर्थः तथा च योग्योपाध्यभा
वनिश्चयस्य प्रतिबंधकस्याभावदयोग्योपाधिसंशयोत्पत्तौ व्याप्यसंशयस्य सत्वाद्व्यापकीभूतव्यभिचारसंशयस्यै
वानिवार्यत्वेन तदुत्पत्तौ प्रतिबंधकस्य सत्वान्न व्याप्तिनिश्चय इति न स्वरूपासिद्धो यं हेतुरिति समुदायार्थः ननु व्या
श१ प्यसंशयेन व्यापकसंशयोत्पत्तौ प्रतिबंधकाभावोप्यपेक्षितः प्रकृते च साध्यसाधनयोर्भूयस्सहचारदर्शनस्य प्रतिबंधक
स्य सत्वात्कथं व्यभिचारसंशयो भविष्यतीत्याशंकायां तस्य प्रतिबंधकत्वमेवासिद्धमित्याह शतशस्सहचरि
तयोरपीति शतशस्सहचरितयोरपि पार्थिवत्वलोहलेख्यत्वयोः क्वचित् हीरकादौ व्यभिचारदर्शनादित्यर्थः
नन्वेवं पर्वतो वह्निमानित्यत्र तिशब्दप्रयोगो न स्यात् तज्जनकीभूतस्यानुमानाधीनपर्वतविशेष्यकवह्निप्रका ६

६ सत्वाद्योग्योपाधिशंकाभावेप्ययोग्योपाध्यभावनिश्चयस्य प्रतिबंधकस्या ६

(१३)

रकज्ञानस्यासंभवाद् दूरीन्द्रियसंनिकर्षाभावेन तादृशप्रत्यक्षस्याप्यसंभवादित्यत आह लोक इति चस्त्वर्थे
धूमादिज्ञानानंतरं लोकानां वह्न्यादिव्यवहारस्त्वित्यर्थः संभवनामात्रादिति धर्मधर्मिणोः संसर्गाग्रहोप
लक्षितधर्मिज्ञानकालीनधर्मज्ञानादित्यर्थः मात्रपदेन नैयायिकमते प्रसिद्धस्यानुमित्यादेर्व्यवच्छेदः न
चासंसर्गाग्रहोपलक्षितपर्वतज्ञानकालीनवह्निस्मरणादेव तादृशव्यवहारोपपत्तौ नातिरिक्तानुमि
तिः कल्प्येति भावः ननु संभावनाया व्यवहारहेतुत्वे तादृशव्यवहारजनकज्ञाने सकलानुभवसिद्धप्रामा
ण्यानुभवानुपपत्तिः चार्वाकमते हि पारमार्थिकविषयकज्ञानं प्रमा अपारमार्थिकविषयकमप्रमा तथा च त
ज्जनकसंभावनाया अपारमार्थिकानुगताकारवह्नित्वादिविषयकत्वे [illegible] न पारमार्थिकविषयकज्ञानत्व
रूपं प्रामाण्यं न संभवति न च पारमार्थिकवह्निविषयकत्वमादाय प्रामाण्यं संभवतीति वाच्यं सदसत्संबंधा
भावेनानुगताकारविशिष्टस्यापि वह्नेरलौकिकत्वादित्यत आह संवादेनेति पारमार्थिकविषकाध्यक्षमूलक

(वह्नित्व) १ (निर्विकल्पक) २

४ (शक्तिग्रहेस्यर्थः तथाच शाब्दबोधजनकीभूत शक्तिग्रहस्य प्रयोज्यत्वस्य प्रत्ययाद्यनुमानाधीनत्वेनोपमानप्रयोजकत्वादिदेशवाक्यार्थबोधस्याप्यसंभवेनतज्जनकत्वेन ...) २ (पूर्वोक्तवक्तृत्वानात्मकसंभावनाविशेष्यकप्रामाण्यभ्रम इत्यर्थः) शाब्दबोधादिः

विषय १ य२

७

सविकल्पकविषयैकत्वलक्षणसंवादात्मकदोषेणेत्यर्थः प्रामाण्याभिमानानु प्रामाण्यभ्रमात् तथाचवह्निनिर्वि
कल्पकमूलकतत्सविकल्पकविषयवह्नित्वविशेषकत्वरूपदोषेणसंभाविनायां प्रामाण्यभ्रमस्सएवतादृशानु
भवनिर्वाहकइतिभावः उपसंहरति इतीति इतिहेतोः प्रत्यक्षभिन्नेनप्रमामित्यर्थः अनुमानाप्रामाण्ये
शाब्दोपमानयोरप्युनरामप्रामाण्यं तयोस्तदधीनत्संभवग्रहमूलकधीजनकत्वादितिभावः अत्रनाप्रत्यक्षं
प्रमाणमित्युपसंहारानुरोधादनुमानंनप्रमाणमित्यत्रानुमानपदमप्रत्यक्षपरतयाव्याख्येयंतेननोपक्रमो
पसंहारविरोधः ननुनुमानत्वावच्छिन्नंपक्षीकृत्यप्रमाणताप्रयोजकधर्मशून्यत्वेनहेतुनाप्रामाण्यसाधनेप्र
कृतानुमानस्यप्रामाण्याप्रामाण्ययोर्बाधः अनुमानस्याप्रामाण्यमनुमानंनप्रमाणमितिशब्देनसाध्यतेचे

शि

त्तदस्यैवप्रामाण्यमिनाप्रत्यक्षंप्रमाणमित्यसंगतमित्याह अप्रमाणसाधर्म्येणेति अप्रमाणवृत्तियत्प्रमाण

ने

ताप्रयोजकधर्मशून्यत्वंतेनेत्यर्थः अर्थप्रमाणसाधर्म्यंचाप्रमाणवृत्तिधर्मवत्त्वमात्रंनतुतद्भिन्नत्वघटितं

(अप्रामाण्यसाधकानुमानस्य) ३ (बाधइतिप्रामाण्यसमापादनमनुमानप्रामाण्येनानतयालेकेनाप्रामाण्यंसाध्यतइतिभावः) ३ ४ (७ ...

१ (चार्वाकस्येत्यादिः) ३ (तस्य कथं प्रामाण्यरूपत्वमन्यत्र) (नवीनमताभिप्रायेण) २

अन्यथा हेतुसिद्ध्यापत्तेः दृष्टसाधर्म्यस्य साधर्म्यदर्शनस्य अनुमानत्वात् अनुमानप्रमाणत्वात् एतद्वाक्य
स्य अनुमानमप्रमाणमिति वाक्यस्य संदिग्धः अनुमानं प्रमाणं न वेति संदेहत्वात् विपर्यस्तः अनुमानविशे
ष्यकाप्रामाण्यप्रकारकज्ञानवान् अप्रामाण्यविपर्यस्य प्रामाण्यरूपत्वात् अर्थवत्वात् अनुमानेन प्रमाणमि
ति वाक्यस्य तयोरन्यतरपुरुषस्य तादृशसंशयादिनाशप्रयोजकतया तन्नाशरूपप्रयोजनवत्वात् तथा चानु
मानस्याप्रामाण्ये परकीयसंदेहादेरप्रत्यक्षत्वेन तज्ज्ञानसंभवस्तदभावे प्रतियोगिज्ञानाभावेन तन्नाशज्ञा न
नासंभवस्तदभावे दृष्टज्ञानाभावेन कंठताल्वाद्यभिघातादौ तत्साधनताज्ञानासंभवस्तदभावेन तत्प्रवृत्त्यभा
वस्तदभावेनादृश्यवाक्यत्वस्यासंभवस्तदभावेऽनुमानेऽप्रामाण्यं केन साधनीयं तस्मात् दृश्यवाक्यस्य तादृशसंशया
शा दिनाशप्रयोजकत्वानुपपत्त्यानुमानस्य प्रामाण्यं स्वीकरणीयमिति वर्तुलार्थः ननु प्रतियोगिज्ञानमभावज्ञाने हेतुर्न तु तन्ना ति
श्च न्नाशः तच्च परकीयसंशयादौ साधारणधर्मदर्शनेन संशयरूपं भविष्यतीति किमनुपपन्नमतो दोषान्तरमाह एतद्वाक्य

५ (नतत्प्रामाण्येऽपि तत्रैव प्रमाणेन परकीयसंशयादेरनुमित्यात्मकत्वान्न संभवतीति भावः)

(94)

८

स्येति अनुमानं न प्रमाणमिति वाक्यस्येत्यर्थः व्याघातश्चेति एतद्वाक्यस्य प्रामाण्ये समार्थिते साक्षादेव शब्दस्य प्रामाण्यं
न स्याप्रामाण्ये समायातमनुमानस्य प्रामाण्यमिति तत्प्रत्यक्षं प्रमाणमित्यसंगतं स्यादित्यर्थः नन्वेतद्वाक्यस्याप्रामाण्ये
अनुमानस्य प्रामाण्यं कथमिति चेदित्थं शब्दस्याप्रामाण्यं भ्रमकजनकत्वं भ्रमत्वं च प्रामाण्यप्रकारकत्वं न चानुमा
नप्रामाण्यं विना न संभवतीति प्रमाजनक[त्व]भिन्नत्वमप्रमाणत्वमिति पक्षे निरुक्तदोषासंभवाद्दोषान्तरमाह अपि चे
ति प्रत्यक्षस्यापि प्रत्यक्षात्मकज्ञानस्यापि अप्रामाण्यापत्तेः प्रमात्वासिद्धिप्रसंगात् अनुमेयत्वात् अनुमानप्रामाण्या
धीनसिद्धिकत्वात् तथा चानुमानस्याप्रामाण्येनान्यस्य प्रामाण्यस्यासंभवेन प्रत्यक्षज्ञानेपि प्रामात्वासिद्धिप्रसंगा
दित्यर्थः ननु प्रत्यक्षस्य स्वप्रकाशत्वेन स्वगतप्रामाण्ये स्वयमेव प्रमाणमिति न प्रमाणान्तरापेक्षेत्यत आह स्वत इति
स्वतः स्वस्मात् तत्संशयानुपपत्तेः प्रामात्वसंशयानुपपत्तेः अयं घट इति व्यवसायतृतीयक्षणोत्पन्नप्रमात्वसंशयस्य स
र्वानुभवसिद्धस्यानुपपत्तेः स्वगतप्रामाण्यस्य स्वेनैव निश्चितत्वेन निश्चये संशयायोगादिति भावः न च स्वस्मात्स्वविष ८

(स्वविषयकत्वेन)

(७६)

२ (सन्मात्रावगाहित्वावगाहित्वस्यापीत्यर्थः) २

१ (तथा च निर्विकल्पके संदेहाभावेऽप्यप्रामाण्यनिश्चयाभावः । नहि संदेहएवोच्छेद्यो येनेत्यत आह परं त्विति असन्मात्रेति तथा च तत्र प्रथमं प्रामाण्य ग्रहणसंशयो न विकल्पकगत इत्यभिप्रायः) १

यके निर्विकल्पकविज्ञाने प्रामाण्यं न संदिह्यते परं तु तदुत्तरभाविनि सविकल्पके तन्मते तस्या सन्मात्रविषयक
त्वेनाप्रमात्वादिति वाच्यं तथापि निर्विकल्पके सन्मात्रावगाहित्वस्यापि स्वेनैवाग्रहो वाच्यः एवं तदवगाहित्वस्या
पीति विषयानवस्थायातादिति संक्षेपः ननु प्रमाणसाधर्म्येण प्रामाण्यस्य धनेऽदृष्टसधर्म्यस्यानुमानत्वादित्यादि
ग्रंथेनानुमानस्य प्रामाण्यं साधितं तच्च सति व्याप्तिनिश्चये स्यात् स एव न संभवति योग्योपाधीनामित्यादिग्रंथेन स
र्वत्र तत्प्रतिबंधकव्यभिचारसंशयस्य प्रदर्शितत्वेनोपायाभावादित्यत आह व्याप्तिग्रहोपायश्च वक्ष्यत इति व्या
प्तिनिरूपणानंतरं वक्ष्यत इत्यर्थः प्राप्तिघटकीभूतसामानाधिकरण्यादिज्ञानादेः कारणत्वप्रतिपादने व्याप्तिस्वरू
पमप्रतिपाद्य न संभवतीति प्रथमं व्याप्तिनिरूपणमारभते ननु इत्यादिना प्रथमव्याप्तिपदं पक्षधर्मत्वाविषयकप
रं द्वितीयव्याप्तिपदं धर्ममात्रपरं ज्ञानइति ज्ञाने निश्चयः सप्तम्यर्थः विषयत्वं तथा चानुमितिजनकीभूतपक्षधर्म
त्वाविषयकनिश्चयविषयीभूता व्याप्तिः केत्यर्थः तद्धीति हि यस्मात् तत् अनुमितिजनकतायां विषयतयाऽवच्छेदकं

२ (इदं च विशेषणीयपक्षता दायविशिष्ट साधन वारणाय) २ मात्रे

४ (पक्षधर्मताविषयकत्वविशेषणेन पक्षनिरासासंभवेपि हेत्वन्तरान्तरं पदोपदस्याशंकनेन चेति) ४

२ (तादृशविच्छेदकं अव्यभिचारितत्वं नाव्यभिचरितत्वविषयक केवलान्वयिसाध्यकानुमितिजनकत्वानविषयत्वादिषु केवलत्वसानस्वतद् विषयकत्वमित्याशंक्य)

१ नेतिसर्वत्रलक्षणेसंबध्यते तथाच अनुमितिजनकतावच्छेदकं यत्तेन साध्याभाववदवृत्तित्वादितत्वोऽव्यभिचरितत्वं नेत्यर्थः तेन न तर्युदयानुपपत्तिः तथाचप्रयोगः अनुमितित्वावच्छिन्नजन्यतानिरूपितज्ञाननिष्ठजनकतायांविषता संबंधेनावच्छेदकं अव्यभिचारपदार्थभिन्नं साध्यभावववदवृत्तित्वादितत्त्वव्यभिचारपदार्थभेदकूटवत्वादिति नंचैवमस्यापिविषयतासंबंधेनावच्छेदकत्वातत्र तादृशपदार्थभेदस्यसिद्धतयासिद्धसाधनमितिवाच्यं पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् तादृशज्ञानीयहेतुनिष्ठविषतानिरूपितोद्देश्यताभिन्नमकारताश्रयस्यवापक्षत्वात् साध्यभाववदवृत्तित्वादिरूपाव्यभिचारपदार्थभेदकूटस्य प्रत्येकसाधकं हेतुंवक्ष्यति केवलान्वयिन्यभावादिति तथाचतादृशजनकतावच्छेदकं साध्याभाववदवृत्तित्वरूपाव्यभिचारपदार्थभिन्नंसा साध्येकेवलान्वयित्वग्रहकालीनानुमितिजनकतावच्छेदकत्वादितिप्रयोगः वस्तुतस्तु अनुमितिजनकत्वंनाव्यभिचारपदार्थावच्छिन्नहेतुविषयितापटितधर्मावच्छिन्नं साध्यभाववदवृत्तित्वादिरूपतत्तदव्यभिचारपदार्थावच्छिन्न १

५ (इदं च पक्षनिरासायन च प्रकारत्वनैव तन्निरासे)
किमनेनेतिवाच्यंपक्षविशेषणकस्यापिपरामर्शस्यानुमितिजनकत्वात्)

६ [illegible]
(गदाधरार्थेनिर्भरसाह) २

यांचिपततःतदस्तत्वव्यभिचारितत्वंसाध्याभाववदवृत्ति

भावकूटवत्त्वादिति १ | साध्याभावावच्छेदकसंबंधेन २

हेतुविषयताघटितधर्मावच्छिन्नत्वाॅंप्रयोगः कूटांतर्गतप्रत्येकाभावसाधकहेतुप्रयोगस्य केवलान्वयित्वग्रह
कालीनानुमितिजनकज्ञानवृत्तित्वादिति साध्याभाववदवृत्तित्वमिति अत्र साध्याभावश्च साध्यतावच्छेदका
वच्छिन्नप्रतियोगिताको ग्राह्यः तेन वह्निमान्धूमादित्यादौ समवायेन वह्न्यादेरभावमादाय तत्तत्साध्यव्य
क्त्यभावमादाय चानाक्षेपः तद्वद्वृत्तित्वाभावश्च तद्वद्वृत्तित्व सामान्याभावो बोध्यः तेन साध्यकेव्यभिचारि
वह्न्यादौ साध्याभाववद्यत्किंचिद्विपक्षवृत्तित्वाभावसत्त्वेऽपि नातिव्याप्तिः साध्याभाववत्त्वं च साध्यवत्ताग्रह
विरोधिता नियामकसंबंधेन वाच्यं अन्यथा वह्निमान्धूमादित्यादौ कालिकसंबंधेन तादृशसाध्याभावव
ति हेतोर्वृत्त्याऽव्याप्त्यापत्तेः येन संबंधेन हेतुता तेन संबंधेन साध्याभाववति वृत्तिर्बोध्या तेन साध्याभाववति
कालिसंबंधेन हेतोर्वृत्तावपि न क्षतिः न चैवमपि सत्तावान् जातेरित्यादौ साध्याभाववति सामान्यादौ तेन
संबंधेन वृत्तेरप्रसिद्ध्याऽव्याप्तिरिति वाच्यं हेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वीयस्वरूपसंबंधावच्छिन्नप्र

धूमादि

२ अथवा तादृशावृत्तित्वं हि हेतुतावच्छेदकसंबंधान्यहेतुप्रतियोगिकसंबंधानवच्छिन्नं हेतुतावच्छेदकसंबंधान्यहेतुतावच्छेदकव्यापकप्रतियोगिताकसंबंधानवच्छिन्नं हेतुतावच्छेदकसंबंधान्य इति मत्वविशिष्ट हेतुतावच्छेदकव्यापकप्रतियोगिताकसंबंधानवच्छिन्नं वा विवक्षणी

३०

तियोगिताकवृत्तित्वसामान्याभावस्याविवक्षितत्वात् प्रकृते तु तादृशाभावो व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताक एव प्रसिद्धः केचित्तु स्वाधिकरणावृत्ति साध्याभावकत्वमेवात्र विवक्षितोऽर्थः स्वपदं हेतुपरं तेन नोक्तदोष इत्याहुः तन्मंदं स्वाधिकरणे हि साध्याभावस्यावृत्तित्वं साध्यवत्तायहविरोधिता नियामकसंबंधेन वाच्यं अन्यथा धूमाधिकरणे कालिकसंबंधेन साध्याभावस्य वृत्त्या वन्हिमान् धूमादित्यादावव्याप्त्यापत्तेः एवं च कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावस्याभावे विशेषणतया साध्ये आत्मत्वहेतावव्याप्तिः साध्यवत्तायहविरोधिता नियामककालिकसंबंधेनात्मनि वृत्तित्वाप्रसिद्धेः किं च सत्ताभाववानित्यादावव्याप्तिः प्रकारांतरानुसरणे गौरवमिति नन्वेवमप्यव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरित्यतो लक्षणांतरमाह साध्यवद्भिन्नेत्यादि साध्यवद्भिन्ने साध्याभाव इति सप्तमीतत्पुरुषः सप्तम्यावृत्तित्वमर्थः तथा च साध्यवद्भिन्नवृत्तिसाध्याभाववृत्तित्वमिति वाक्यार्थः अत्राव्याप्यवृत्तिसाध्यकसद्धेतुसंग्रहाय साध्यवद्भिन्न इति साध्यतावच्छेदकविशिष्टसाध्यवत्तावच्छिन्न

४ ववान् प्रत्यभा ४

[illegible]

४ (हेत्वाघटकसंबंधावच्छिन्नप्रकृष्टावच्छिन्नाधेयतासामान्ये साध्याभाववन्निरूपितत्वाभावः न प्रसक्तत्वमपि विवक्षणीयत्वर्थः) ४

[illegible]

३०

२०

५ (द्रव्यत्वादेरभावत्वविरहात्) (भावाभावसाधारण) ३ (अखंडाभावघटकतया) ४ (ज्ञानस्य लक्ष्यत्वे संभवोन्यथाव्याप्तिः) २

भिन्नेत्यर्थः तेन साध्यवत्प्रतियोगिकभेदवति हृदे साध्याभावस्य सत्वेपि न तत्राव्याप्तिः न च साध्याभावपदमन
र्थकं वन्हिमान् धूमादित्यादौ वन्ह्यादिमद्भिन्नवृत्तिप्रमेयत्वादिकमादाया संभवस्याव्याप्तेर्वा पत्तेः अभावपददा
नेपि अभावत्वरूपाखंडोपाधिपुरस्कारेणाभावस्य लक्षणे प्रवेश्यतयोक्तदोषवारणस्यासंभवेन तद्दानस्या
वश्यकत्वात् यथासंनिवेशे वैयर्थ्याभावात् ननु प्रतियोग्यपेक्षया ऽभावाभावस्यातिरिक्तो न वा नाद्यः साध्यपदस्य
वैयर्थ्यापत्तेः न द्वितीयः घटत्वघटाकाशसंयोगान्यतराभाववनाकाशत्वादित्यादावव्याप्तेः अन्यतराभावाभा
वस्यान्यतरांतर्गतघटाकाशसंयोगस्य साध्यवद्भिन्नघटवृत्तेराकाशेपि सत्वेन तत्र हेतोर्वृत्तेरिति चेन्न प्रतियोगि
सामानाधिकरण्यतदभावरूपविरुद्धधर्माध्यासो यत्र नास्ति तत्रैवाभावाभावस्य प्रतियोगिरूपत्वाभ्युपग
मात् घटत्वघटाकाशसंयोगान्यतराभावाभावस्य चातिरिक्तत्वात् अधिकरणभेदेन भिन्नत्वाच्चेति ध्येयं न व्यास्त
अभावाभावस्यातिरिक्तत्वमेव न च साध्यपदानर्थक्यं स्वप्रतियोगितावच्छेदकसंबंधेन साध्यवान् यस्तद्भिन्नत्ववतीते

(तथा च साध्यवद्भिन्नघटवृत्तेरभावस्याकाशेऽसत्वान्नाव्याप्तिरिति भावः) २

(साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकसंबंधेनेत्यर्थः) १
द

(साध्यतावच्छेदकसंबंधपदप्रयोजनमाह) १

११ यस्साध्यतावच्छेदकसंबंधेन साध्यीयोऽभावस्तदवृत्तित्वं तत्त्वमिति फलितार्थः तेन समवायेन साध्यवह्निभिन्ने पर्व
ते वर्तते यस्समवायेन वह्न्यभावस्तद्वृत्तिधूमरूपहेतोस्तत्त्वेऽपि न वह्निमान् धूमादित्यादावव्याप्तिः इदंच
अभावे साध्यीयत्वानुपादाने घटत्वप्रकारकत्वविशिष्टज्ञाने विशेष्यतया साध्ये समवायेन घटत्वहेतौ संयोगे
न वह्नौ साध्ये तेनैव धूमहेतौ चाव्याप्तिः समं नेयताभावानामैक्यस्वीकारेण विशेष्यतासंबंधेन घटत्वप्रकारि
त्वविशिष्टज्ञानाभावस्य समवायेन घटत्वाभावाभिन्नतया संयोगेन वह्न्यभावस्य समवायेन तद्वृत्तित्वविशि
ष्टद्रव्यत्वाभावाभिन्नतया स्वप्रतियोगितावच्छेदकसमवायेन साध्यवानात्मावन्त्यावयवश्च तद्भिन्ने घटे पर्व
ते यस्साध्यतावच्छेदकसंबंधेन पटत्वप्रकारकपटविशेष्यकज्ञानाभावः पटाभावश्च तद्वृत्ति घटे पर्वते च घट
त्वहेतोर्धूमरूपहेतोश्च तत्त्वे नचैवं विशेष्यतासंबंधेन तद्वृद संबंधत्वविशिष्टज्ञानभावस्य तद्वृद्वृत्तित्वविशि
ष्टद्रव्यत्वाभावस्य चैक्यात् साध्यीयत्वोक्तावपि नाव्याप्तिनिरास इति वाच्यं साध्यतावच्छेदकावच्छिन्नप्रतियोगिताक ११

(यद्यपि स्वपदेन पटत्वप्रकारकज्ञानाभावमादाय दोषस्य तादृशाभिन्नोपपादनं विनैव संभवति स्वपदस्य प्रतियोग्यभावपरत्वात्) ५
५ (तथापि स्वपदं साध्याभावपरमेवेति अभावपदमपि बोध्यं) ५ (महानसीयवह्न्यभावमादाय प्रसिद्धस्थलेऽपि दोषो बोध्यः) २
कपी

(इत्यहुरितिशेषः) ५४ (ननु अत्राव्याप्तिर्दुर्वारैव वृक्षस्य कपिसंयोगावच्छिन्नभेदस्यैतद्वृक्षेपि सत्वात् न चात्र कपिसंयोगपदमेतदादीनि वा

त्वस्य तदर्थत्वात् नन्वधिकरणभेदेनाभावभेदे मानाभावः अन्यथाऽभावानां तत्तदधिकरणस्वरूपत्वकल्पना

पेक्षयाऽलाघवाभावेन मीमांसकाश्रयेरन् इत्थं चाव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिर्दुर्वारैत्यत आह

साध्यवत्प्रतियोगिकेति तत्साध्यव्यक्त्यवच्छिन्नप्रतियोगिताकान्योन्याभावासामानाधिकरण्यं व्याप्तिरित्यर्थः ते

न संयोगी वानेतद्वृक्षत्वादित्यादौ नाव्याप्तिः ननु नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिस्तत्रैकसाध्यवत्प्रतियोगिक

भेदवति साध्यवदन्तरस्य वर्तमानत्वात् तत्राह सकलेति धूमवान्वह्नेरित्यत्र साध्याभाववदिपक्षैकदे

शनिष्ठाभावप्रतियोगित्वस्य वह्नौ सत्वादतिव्याप्तिवारणाय साकल्यं साध्याभाववद्विशेषणं साध्याभावश्च पूर्वो

क्तरीत्या प्रत्येतव्यः प्रतियोगितावच्छेदकविशिष्टव्यधिकरणश्च तेन वह्निमान्धूमादित्यादौ चालनीन्याये

न नाव्याप्तिः न वा कपिसंयोगे सध्ये एतद्वृक्षत्वे हेतौ विशिष्टसत्वे च समवायेन सध्ये तेनैव ज्ञातृत्वाव्याप्तिर

तिव्याप्तिर्वा हेत्वभावोपि हेतुतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः तेन द्रव्यं सत्वादित्यादौ तादृशद्र

५ धी (इति चित्तहस्ति ज्ञानमारमते) धी ५

१२

न्यत्वाभाववद्गुणादिनिष्ठविशिष्टसत्ताभावप्रतियोगित्वस्य सत्त्वे हेतौ सत्त्वेऽपि नातिव्याप्तिः हेत्वभावे प्रतियोगिवैयधि-
धिकरण्यं वाच्यं तच्च प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यनधिकरणवृत्तित्वं तेनायं घ-
टत्ववान् कपिसंयोगादित्यादौ कपिसंयोगाभावस्य केवलान्वयित्वेन तादृशघटत्वाभाववत्त्वकत्वनिष्ठाभावप्रतियो-
गित्वस्य कपिसंयोगे सत्त्वेऽपि नातिव्याप्तिः न वा द्रव्यं विशिष्टसत्त्वादित्यादौ तादृशद्रव्यत्वाभाववति गुणादौ विशि-
ष्टसत्ताभावस्य प्रतियोगिव्यधिकरणत्वाभावे व्याप्तिः प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वनि-
वेशाद्वह्निमान् धूमादित्यादौ तादृशवन्ह्यभाववति ह्रदादौ धूमाभावस्य कालिकादिसंबंधेन प्रतियोगिसामा-
नाधिकरण्येऽपि नाव्याप्तिः एवं हेत्वभावीयं प्रतियोगित्वं हेतुतावच्छेदकसंबंधेन निसंयोगेन वह्निमान् समवायेन
धूमादित्यत्र नातिव्याप्तिः अत्र निरुक्तप्रतियोगिव्यधिकरणत्वविशिष्टनिरुक्तसाध्याभाववत्त्वकत्वनिष्ठनिरुक्तप्रति- १२
योगिव्यधिकरणत्वविशिष्टाभावीयहेतुतावच्छेदकावच्छिन्नप्रतियोगित्वमिति निष्कृष्टार्थो बोध्यः तेन कपिसंयोग्येन

वृक्षत्वादित्यादौ गुणादौ प्रतियोग्यधिकरणस्य साध्याभावस्य वृक्षादिवृत्तित्वेपि नाव्याप्तिः नवायं घटत्ववान् कपिसंयो
गादित्यादौ साध्याभाववति घटादौ गुणादौ प्रतियोगिव्यधिकरणस्य हेत्वभावस्य वृत्तित्वेप्यतिव्याप्तिरिति दीधि
तिकृतः केचित्तु अत्र प्रतियोगिवैयधिकरण्यं हेतुतावच्छेदकविशिष्टहेत्वनधिकरणवृत्तित्वरूपं ग्राह्यं तेन द्रव्यत्वे सा
ध्ये विशिष्टसत्तारूपहेतौ नाव्याप्तिः प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यनधिकरणवृत्तित्वरूपं तु न प्रकृते निवेश
नीयं तथा सति द्रव्यत्वे साध्ये सत्तारूपहेतौ द्रव्यत्वाभाववद्वृत्तितादृशगुणकर्मान्यत्वविशिष्टसत्ताभावप्रतियोगित्वस्य
सत्त्वेनातिव्याप्त्यापत्तेः न च हेतुतावच्छेदकावच्छिन्नत्वं प्रतियोगितायां निवेशनीयमिति वाच्यं गौरवात् अस्मन्मते तु सा
ध्याभाववत्सकलांतःपातिनि गुणादौ सत्तात्वरूपहेतुतावच्छेदकविशिष्टहेत्वनधिकरणवृत्तित्वरूपप्रति
योगिवैयधिकरण्यस्य विशिष्टसत्ताभावेऽसंभवेन तत्रातिव्याप्तेरसंभवेन प्रतियोगितायां तदनिवेशे
न लाघवमेवं हेतुतावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यनिवेशेन समंजस्येद्वाधानन्निवेशोप्ययु

कइत्याहुः ॥ दीधितिकृतस्तु निर्धूमत्वव्याप्यवान्वन्हस्वभावादित्यादावव्याप्तिः तादृशसाध्याभाववत्सकलान्तर्गतपर्वत
महानसादौ वन्ह्यभावाभावस्य तत्तद्व्यक्तित्वेनैकस्याप्यसत्त्वादित्यनुशयेन लक्षणान्तरमवतारयंति तत्र पूर्वोक्तपद
र्शितपरिष्कारे संभवंतीमप्यव्याप्तिं हेत्वभावस्य प्रतियोगिवैयधिकरण्यशरीरे हेतुतावच्छेदकसंबंधेन हेत्वनधि
करणत्वनिवेशं लाघवाद्यवस्थापयंतः परेन क्षमंते इति वन्ह्यभावरूपहेतोर्भेदमादायैव तत्र लक्षणसमन्वयसंभवा
त्नाव्याप्तिरिति अत्र केचित्तु साध्याभाववति हेत्वभावस्य वृत्तित्वं हेतुतावच्छेदकसंबंधेन हेतुपत्ताग्रहविरोधिना
नियामकसंबंधेन वाच्यं अन्यथा साध्याभाववति हेतुतावच्छेदकसंबंधेन हेतुमत्त्वरूपव्यभिचारग्रहस्य साध्या
भाववति केनचित्संबंधेन हेत्वभावग्रहे केनचित्संबंधेन साध्याभाववन्निष्ठहेत्वभावप्रतियोगित्वरूपप्रकृतव्याप्ति
ग्रहो सत्याप्रकृतव्याप्तिग्रहप्रतिबंधकता न स्यात् एवं चोक्तस्थले पर्वतमहानसादौ हेतुभेदस्य तेन संबंधेनावृ
त्त्याव्याप्तिर्दुरुद्धरैवेति तत्र साध्याभाववति हेतुतावच्छेदकसंबंधेन हेतुमत्त्वरूपव्यभिचारग्रहस्य हि न केवलं

साध्याभाववन्निष्ठाभावप्रतियोगित्वरूपव्याप्तिग्रहं प्रति प्रतिबंधकत्वं किंतु साध्याभाववद्वृत्तिहेत्वभावांशे न हे
तुनावच्छेदकसंबंधेन प्रतियोगिनावच्छेदकविशिष्टप्रतियोग्यनधिकरणवृत्तित्वावगाहिप्रकृतव्याप्तिग्रहं प्र
तिबंधकत्वे न थाच साध्याभाववति हेतावच्छेदकसंबंधेन हेतुमत्त्वरूपव्यभिचारग्रहदशायां केन चित्संबंधेन
साध्याभाववद्वृत्तिहेत्वभावांशे हेतुनावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यावगाहिप्रकृतव्याप्तिज्ञाना
नुत्पत्त्यातत्प्रतिबंधकत्वान्यथानुपपत्त्यभावे विमिति हेतुमत्ताग्रहविरोधितानियामकसंबंधेन हेत्वभावस्य वृत्ति
त्वं वाच्यं इति तत्र दीधितिकृतामयमाशयः साध्यसाधनभेदेन व्याप्तेर्भिन्नतयाऽव्याप्यवृत्तिहेतुकस्थल
एवाभावद्वये प्रतियोगिवैयधिकरण्यं देयं न युनव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिहेतुकस्थले प्रयोजनविरहात्
इत्थं च कालभिन्नं सत्वादित्यादौ साध्याभाववति काले सत्ताभावस्य कालिकसंबंधे नवृत्त्याऽनुतिव्याप्तिवा
रणाय हेत्वभावस्य हेतुमत्ताग्रहविरोधितानियामकसंबंधेन वृत्तित्वं वाच्यं एवं च निर्धूमत्वव्याप्यवानूवन्ध्यभा

३४

वादित्यादावव्याप्तिर्दुर्वारा वन्ह्यभावस्याव्याप्यवृत्तित्वे तु नादृशस्थले तत्र आदिपदग्राह्ये व्याप्तिर्बोध्ये
ति पुनर्नवीनाः वस्तुतस्तु यद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वेन साध्याभावव्यापकता तद्धर्मवत्त्वं तत्त्व
मिति परिष्कारे तु न दोषः वन्ह्यभावाभावत्वेन साध्याभावव्यापकत्वस्य तत्र सत्त्वादिति सारं इतो पि लघु
लक्षणांतरमाह साध्यवदन्येत्यादि साध्यतावच्छेदकविशिष्टसाध्यवत्त्वपर्याप्तप्रतियोगितावच्छेदकता
कभेदवदवृत्तित्वं तत्त्वमित्यर्थः तेन साध्यवद्व्यक्तिविशेषभेदं ~~तत्तद्वन्हिमत्तावच्छिन्नप्रतियोगिताकभेद~~
तत्तद्वन्हिमत्तावच्छिन्नप्रतियोगिताकभेदं चादाय न वन्हिमान् धूमादित्यादावव्याप्तिः न चैतादृशार्थला
भे नियामकाभावः अन्यपदसमभिव्याहारस्यैव नियामकत्वात् अन्वयितावच्छेदकावच्छिन्नप्रतियोगि
ताकाभावविषयकशाब्दबुद्धित्वावच्छिन्नं प्रत्येव नञ्पदसमभिव्याहारज्ञानस्येवान्यपदसमभिव्याहारज्ञान
स्यापि जनकत्वोपगमात् अत्र साध्यवत्पदस्य ताशर्स [illegible]ध्यवत्प्रतियोगिताके लक्षणा तस्यान्यपदार्थैकदेशेभे

३४

(२८)

दे॰भेदेनान्वयोबोध्यः वृत्तित्वाभावः एवंवदितिलक्षणपंचकमेव दूषयति केवलान्वयितीत्यादिना इदं वाच्यं ज्ञेय
त्वादित्यादावित्यर्थः प्रथमचतुर्थलक्षणयोरपि संयोगाभावानुगुणत्वादित्याद्यव्याप्त्यवृत्तिकेवलान्वयिस्थले
पिनिरुक्तप्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धाऽव्याप्तिर्बोध्या सिंहव्याघ्रलक्षणमाशंक्य निराकरोति
नापीति साध्यसामानाधिकरण्यं न साध्याधिकरणावृत्तित्वं द्रव्यत्वे साध्ये सत्तादावतिव्याप्तेः नापि साध्यान
धिकरणाधिकरणत्वं द्वितीयाभेदापत्तेः किंतु साध्याधिकरणत्वव्यापकभेदप्रतियोगितावच्छेदकाधिक
रणत्ववद्वृत्तित्वं तदभावत्वमेवतत्वं चरमाधिकरणांत्वांशस्यानतिप्रयोजनकत्वात् वह्निमान्धूमादित्या
दौ वन्ह्यधिकरणत्वावच्छेदेन नधूमादिकरणत्वावच्छिन्नभेदः किंतु जलत्वनिष्ठाधिकरणत्वावच्छिन्नभेदः धूमा
दौ च न तद्वद्वृत्तित्वमिति लक्षणसंगतिः व्यभिचारिणि साध्याधिकरणत्वावच्छेदेन व्यभिचारनिरूपका
धिकरणनिष्ठाधिकरणत्वावच्छिन्नभेदस्य सत्वान्नातिव्याप्तिः साध्याधिकरणत्वं च येन संबंधेन येन रूपेण

१५

साध्यतावेनसंबंधेन नेनरूपेण तदधिकरणत्वं तेन दैशिकविशेषणतया महाकालभेदे साध्ये कालिक
संबंधेन घटत्वे हेतौ कालिसंबंधेन साध्याधिकरणत्वव्यापकभेदप्रतियोगिनि तेन संबंधेन वृत्तित्वाभाव
सत्वेपि नातिव्याप्तिः नवाविशिष्टसत्वे साध्ये जातिरूपहेतावतिव्याप्तिः व्यापकत्वनिवेशाद्वन्हौ साध्ये धूमे
पर्वतनिष्ठभेदप्रतियोगितावच्छेदकाधिकरणत्व महानसेवृत्तावपि नाव्याप्तिः नचतादृशभेदप्रतियोगि
तावच्छेदकत्वात्कैवसर्वसामंजस्ये तदवच्छेदकाधिकरणत्ववृत्तित्वपर्यंतानुधावनं व्यर्थमिति वाच्यं
द्रव्यं सत्वादित्यादावतिव्याप्तेः सत्तायास्तादृशभेदप्रतियोगितानवच्छेदकत्वात् यद्वा साध्याधिकरण
त्वव्यापकाभावप्रतियोग्यधिकरणत्ववृत्तित्वं न तु साध्याधिकरणत्वादिनिवेशस्तत्प्रयोजनं च दर्शितं देवत्वो
ध्यं अथैवं वक्ष्यमाणकेवलान्वयिनि साध्यासामानाधिकरण्यप्रसिद्धिनिबंधनाव्याप्तिकथनमसंगतं के
वलान्वयिसाध्यके आकाशाभाववत्वरूपत्वरूपहेतुविशेषे लक्षणं च संगतमेव आकाशाभावभिन्नवृत्त्यधि १५

एत्या२

१ वाच्यत्वव्यापकत्वात् तत्प्रतियोग्यधिकरणत्ववद्वृत्ति त्वाभावस्याकाशाभावत्वे सत्त्वाच्चेति चेन्न वाच्यत्वाधिकरणत्वावच्छेदे

करण त्वाभावस्याकाशाभावात्मनोऽपि तादृशाधिकरणत्वाभावस्य तत्त्वेन वृत्तित्वानंगीकारात् अन्यथाभावमात्राधिक

रणत्वं विलुप्येत यन्निष्ठाधिकरणत्वत्वावच्छिन्नप्रतियोगिताकाभावसत्त्वेन साध्याधिकरणत्वव्यापकत्वमभाव

स्य तद्वृत्तित्वविवक्षणाद्वा एवंच वाच्यत्वाधिकरणे आकाशाभावभिन्ने वर्तमाने तत्पदधिकरणत्वं तदभावभावरूपं तदधि

करणत्वाभावत्वस्य तत्प्रतियोगितावच्छेदकत्वाद्धूमसंगतिरित्यवधेयं न च साध्याधिकरणत्वव्यापकाभावप्रतियोग्यधि

धिकरणे च धूमाभावं वेधूमस्य समवायेन वृत्त्या वह्निमान् धूमादित्यादावव्याप्तिः न च तद्वृत्तित्वं हेतुतावच्छेदक

संबंधेन वाच्यं तथा सति सत्तावान् द्रव्यत्वादित्यादावव्याप्तिरिति वाच्यं वृत्तित्वस्य संबंधसामान्यावच्छिन्नस्यैव नि

वेशात् तदभावस्य तु हेतुतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकस्य निवेशात् साध्यवैयधिकरण्यं साध्यान

धिकरणवृत्तित्वं तदभाववत्वेन तत्त्वं अत्रापि चरमाधिकरणत्वांशस्यानतिप्रयोजनकत्वात् तादृशार्थोलभ्य इति

मंतव्यं एतद्द्वितीयपंचमलक्षणयोर्भेदस्तु वृत्तित्वावच्छिन्नभेदवृत्तित्वात्यंताभावभेदकृतो द्रष्टव्यः लक्षणद्वय

इति तृतीयस्वरूपसंबंधावच्छिन्न ३

गोकाशाभावत्वमतो १ [illegible]

ल२

व४

(39)

मेकोक्त्यानुपपद्यद्दूषयति तदुभयमपीति चरमाधिकरणत्वांशपरित्यागेनासामानाधिकरण्यघटितलक्षणं साध्या
नधिकरणानधिकरणत्वशब्दप्रतिपाद्यं वैयधिकरण्यघटितलक्षणमपि तादृशशब्दप्रतिपाद्यमित्यर्थः द्वयो
रेकशब्दप्रतिपाद्यत्वं तु साध्यानधिकरणानधिकरणत्वमित्यत्र साध्याधिकरणपदं सप्तम्यन्तमधिकरणत्व
परं साध्याधिकरणत्वावच्छेदेनेति तु तदर्थः द्वितीयाधिकरणपदमप्यधिकरणत्व परं तथा च साध्याधिकर
णत्वावच्छेदेन यदधिकरणत्वं नेति व्युत्पत्त्या साध्याधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणत्ववद्वृत्तित्वप्रती
यते तद्वृत्तित्वप्रत्ययेन नत्वं साध्यपदोत्तरसन्निविष्टनञा तदभावइति प्रथमलक्षणस्य तादृशवाक्यप्रतिपाद्यता
साध्यानधिकरणमधिकरणं यस्येति व्युत्पत्त्या साध्यानधिकरणवृत्तिप्रत्याय्यते तद्वृत्तित्वप्रत्ययेन नत्वं द्वितीय
नञा तदभावइति द्वितीयलक्षणस्यापीत्यनया दिशावसेयं केचित्तु सा साध्यासामानाधिकरण्यं साध्यनिष्ठा
धेयत्वानिरूपकाधिकरणवृत्तित्वं ॥ तदनधिकरणत्वमेव नत्वं साध्यनिष्ठाधेयत्वानिरूपका धिकरणत्वव्याप

काभावप्रतियोग्यधिकरणतासामान्यकत्वमितिनिष्कर्षः तेनसत्तावान्द्रव्यत्वादित्यादौनदोषः अनु
वादनीयकलक्षणंतुसाध्यंयदधिकरणानधिकरणत्वाभावरूपेत्याहुः तच्चलक्षणद्वयंचसाध्याधिक
रणत्वव्यापकत्वनिवेशेकेवलान्वयिनितादृशसाध्याधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणत्वाप्रसि
द्धासाध्यवत्त्वावच्छिन्नभेदाप्रसिद्ध्याचाव्याप्तिरित्याह नचेति केवलान्वयिसाध्यकसद्धेतावित्यर्थः यदिसाध्या
धिकरणत्वसमानाधिकरणाभावप्रतियोग्यनधिकरणत्वंसाध्यवत्प्रतियोगिकभेदवत्त्वंच निवेश्यतेतदानाना
व्याप्तिसाध्यकसद्धेतौसर्वत्राव्याप्तिरित्याह यत्किंचिदिति साध्याभावघटितप्रथमलक्षणस्यकेवलान्व
यिनिदूषणंपरिहर्तुंस्सारस्यमतमाशंकते अथेति अत्रएवकारस्यभिन्नक्रमेणान्वयः तदवच्छेदंतुप्र
सिद्धाभावेसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वंतथाचकेवलान्वयिनिसाध्यतावच्छेदकावच्छिन्नप्रतियो
गिताकसाध्याभावस्याप्रसिद्धत्वेपिव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावप्रसिद्धेर्वनाभावाप्रसि

(33)

३७

द्वि निषेधनाव्याप्तिरिति भावः समवायित्वया वाच्यत्वाभाव इत्युपलक्षणं घटत्वादिनापि वाच्यत्वाभावो
द्रष्टव्यः प्रसिद्धः प्रामाणिकः तेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्याप्रामाणिकत्वात्तम
भावमादायाव्याप्तिवारणासंभव इति शंकापरिहृता घटएव प्रसिद्धः घटेपि प्रसिद्ध इति केचित् नन्विदं वाच्यं
ज्ञेयत्वादित्यादौ समवायित्वया वाच्यत्वाभावमादाय कथमव्याप्तिवारणं वह्निमान् धूमादित्यादौ महानसीयव
ह्न्यभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावस्यावश्यकं निवेशनीय
त्वादिति चेन्मैवं समनियताभावानामनैक्यस्वीकारमते साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकविशिष्टसा
ध्याधिकरणवृत्ति समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावोभयत्वावच्छिन्नभिन्नत्वस्य प्रकृतलक्ष
णघटकीभूताभावे विशेषणात् साध्यतावच्छेदकावच्छिन्नसाध्याभावव्यधिकरणधर्मावच्छिन्नप्रतियो
गिताकाभावोभयसंग्रहाय उभयत्वावच्छिन्नभिन्नत्वनिवेशः तदैक्यास्वीकारे तु समानाधिकरणध

३७

च्य

र्मावच्छिन्नप्रतियोगिताकाभावस्थाने गगनाभावं प्रक्षिप्योभयभिन्नत्वं तत्र विशेषणं देयं ननु वा॑ त्ववति घटे भिन्नं
कथं व्यधिकरणधरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य प्रसिद्धिः प्रतियोगिना सममसत्यताभावस्य विरोधा
दित्यत आह व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्येति प्रतियोग्यवृत्तिधर्मावच्छिन्नप्रतियोगिता
काभावस्येत्यर्थः केवलान्वयित्वात् तथा च न केवलं प्रतियोगिना सममभावस्य विरोधः किंतु प्रतियोगितावच्
छेदकविशिष्टप्रतियोगिना समं प्रकृते च प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्ध्या न विरोधसंभवइ
ति भावः नन्वेवमिति एवं साध्याभावत्वेनाभिमतव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावमादाय
घटान्तर्भावेन प्रसिद्ध्युपपादने घट एव व्यभिचार इति घटान्तर्भावेन केवलान्वयिनि व्यभिचार एव नाव्यभि
चार इत्यर्थः तथा च केवलान्वयिसाध्यकहेतौ व्यभिचारित्वेन तत्संग्रहायैतेनावानायसोऽनुचित इति भा
वः अथवा केवलान्वयिसाध्यकहेतोरव्यभिचारितरक्षणाय लक्षणघटकत्वेन व्यधिकरणधर्मावच्छिन्ना

३८

भावस्यस्वीकारेव्यभिचारित्वापत्तिरस्वीकारे व्यभिचारित्वं नस्यादित्युभयथापिव्याघात इतिभावः ननुसाध्याभाव
वद्वृत्तित्वमात्रं नव्यभिचारः कपिसंयोग्येतद्वृक्षत्वादित्यादावपिव्यभिचारापत्तेः किंतुव्यधिकरणसाध्याभा
ववद्वृत्तित्वं नचव्यधिकरणधर्मावच्छिन्नाभावस्त्वादृशघटइति चेदस्तुतावदेवमायातन्तस्तथापिसाध्याभा
वीयनिरवच्छिन्नाधिकरणतावद्वृत्तित्वस्य नतेप्यदोषः नचैवमपिकालिकसंबंधावच्छिन्नाकाशाभावाभाववेसा
ध्येऽप्यात्मत्वादिहेतोर्व्यभिचारित्वापत्तिरिति वाच्यं अधिकरणतायां साध्यवत्ताग्रहविरोधिग्रहविषयसंबंधाव
च्छिन्नत्वस्यविवक्षितत्वात् संयो[illegible]दाभावस्तु नसंयोगः प्रतियोगितावच्छेदकात्यंताभावस्य प्रतियोगिभेदसम
त्यनीयमादित्याशयः तेनसंयोगिभिन्नमेयत्वादित्यादौ नक्षतिः निरुक्तसाध्याभाववद्वृत्तित्वंसाध्यतावच्छेद
कावच्छिन्नाभाववद्वृत्तित्वं वान व्यभिचारः तथासति वह्नौ साध्ये धूमे महानसीयवह्न्यभाववद्वृत्तित्वस्य वह्नित्वे
नपद्माभाववद्वृत्तित्वस्य च सत्त्वेन व्यभिचारित्वापत्तेः किंतुसाध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकावच्छिन्न
साध्याभाववद्वृत्तित्वं तथाच प्रकृते साध्यतावच्छेदकावच्छिन्नसाध्याभावाप्रसिद्धानद्वृत्तिनव्यभिचारस्यापप

प्रतियोगि २

त्व

गिभे

३८

सिद्धत्वेन तद्वृत्तत्वरूपव्यभिचारत्वसंभवेनाव्यभिचारित्वमक्षतमित्याशयवांश्चैवमित्याशंक्य निराकरोति साध्यतावच्छेदकेत्यादिना तादृशाभावः साध्यतावच्छेदकावच्छिन्नसाध्याभावः अत्र दर्शितक्रमात्तत्र व्यभिचारः किंतु प्रकृतसाध्यतावच्छेदकावच्छिन्नत्वघटितः अन्यथा यत्किंचित्साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्यापि व्यभिचारित्वापत्तेः तादृशव्यभिचारसामान्याभाववत्त्वमेवाव्यभिचारितत्त्वं पदस्य
सन्यात तथैवार्थसंभवात् प्रकृते च तादृशव्यभिचाराप्रसिद्ध्या तत्सामान्याभाववत्त्वरूपाव्यभिचरितत्त्वं हेतावप्रसिद्धमित्यव्याप्तिर्दुर्वारेत्याशयेनाह न हीति प्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्य व्यभिचारत्वमित्यर्थः तादृशसाध्याभावेति साध्यतावच्छेदकसंबंधावच्छिन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वसामान्याभावो व्याप्तिरित्यर्थः तथा चेति तादृशवृत्तित्वसामान्याभावस्य व्याप्तित्वरूपत्वमित्यर्थः अप्रसिद्धिरिति केवलान्वयिसाध्यके हेतौ तादृशव्यभिचाराप्रसिद्ध्या तदभावरूपाव्यभिच

३९ वितत्वस्याप्रसिद्धिरित्यर्थः ननु पारिभाषिकमेवाव्यभिचरितत्वं न यौगिकमुच्यते तथाहि यावंतस्साध्यतावच्छेदका
वच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिकाभावाः प्रत्येकं तत्प्रतियोगितानवच्छेदकं यद्रूपावच्छिन्नव्यापक
तावच्छेदकं तद्रूपवत्त्वं तत्त्वं धूमवान्वह्नेरित्यादौ व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिवारणाय
यावंत इति महानसीयवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकेत्या
दि यावतां तादृशाभावनिरूपितप्रतियोगितानकाचिदपीति प्रत्येकपदं अत्र यद्रूपावच्छिन्नव्यापकत्वं प्रतियो
गितावच्छेदकसंबंधेनैवसंबंधेनैर्वविशनीयं वाच्यं अन्यथा वन्ह्यादिकं प्रति धूमादीनामपि कालिकसं
बंधेन व्यापकतया व्यभिचारिण्यतिव्याप्त्यापत्ते एवं च साध्यव्यापकत्वमपि तेनैव संबंधेन निवेशनीयं तेन स
मवायेन वह्न्यभावमादाय नाव्याप्तिः तथा चेदं वाच्यं ज्ञेयत्वादित्यादौ व्यधिकरणसंबंधावच्छिन्नप्रतियोगिताका ४०.
भावस्य लक्षणघटकतानसंभवतीति व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्योपयोगिता साध्यताव

35

वच्छेदकावच्छिन्नत्वादितिनिवेशनप्रयोजनं स्पष्टमित्यनुपन्नविस्तर इत्यत आह प्रतियोग्यवृत्तिश्चेति अन्यथ
मेतत्वमविवक्षितं अवृत्तेरपितत्वस्यखंडनीयत्वात् तत्वेमानाभावादितिहेतुकल्पः विशिष्यवाच्यत्वावृत्तित्वप
क्षतावच्छेदकीकृत्यवाच्यत्वनिष्ठप्रतियोगितावच्छेदकत्वाभावः साधनीयः तन्निष्ठप्रतियोगितावच्छेदकत्वंचसं
बंधांतराद्यवच्छिन्नप्रतियोगितावच्छेदके प्रसिद्धं तेननसाध्याप्रसिद्धिः ननुसामान्यतः प्रतियोग्यवृत्तित्वंपक्ष
तावच्छेदकीकृत्यतत्प्रतियोगितावच्छेदकत्वाभावस्साधनीयः सर्वेषांकिंचित्प्रतियोगिवृत्तित्वात्किंचित्प्रति
योगितावच्छेदकत्वाच्च अथवाविशिष्यसमवयित्वंपक्षीकृत्यवाच्यत्वादिनिष्ठप्रतियोगितावच्छेदकत्वाभाव
स्साधनीयः वाच्यत्वरूपप्रतियोग्यवृत्तित्वमेवहेतुः सामान्यमुखोव्याप्तिश्चयोयदवृत्तिस्सतन्निष्ठप्रतियो
गितानवच्छेदकः योविषयतान्ययद्वदवृत्तिस्सतदनवच्छेदक इतिवाबोध्या अत्र दंडादिनिष्ठकारणघट
त्वादिव्यधिकरणघटत्वादिस्तन्निष्ठकारणतानवच्छेदक एवान्वयदृष्टांतो बोध्यः विषयतान्यत्वेनयत्पदार्थ

२०

विशेषणाद्रं गवृत्तिरजनत्वादेस्तन्निष्ठभ्रमविषयतावच्छेदकत्वेपिनक्षतिः ननुयत्रयत्संबंधावच्छिन्नयन्निष्ठप्र
तियोगितानवच्छेदकत्वं साधनीयं तत्रतेनसंबंधेनैव तदवृत्तित्वं वाच्यं अन्यथाकालिकसंबंधेनघटवृत्तिपट
त्वादौघटनिष्ठप्रतियोगितायांसमवायसंबंधावच्छिन्नानवच्छेदकत्वसाधनं नस्यात् तथाचसमवायसंबंधा
वच्छिन्नवाच्यत्वनिष्ठप्रतियोगितानवच्छेदकत्वस्य घटत्वादौसाधाननुपपत्तिःसमवायसंबंधेनवाच्यत्ववृत्तित्वा
प्रसिद्धेरितिचेन्मैवंप्रतियोगिनिष्ठाभावप्रतियोगित्वस्य समवायादिसंबंधावच्छिन्नस्य प्रथमकल्पे पक्षतावच्छेद
कत्वात् द्वितीयकल्पेहेतुत्वाच्च अभावश्चप्रतियोगिव्यधिकरणोबोध्यः तेनसंयोगस्यसंयोगाभावप्रतियो
गिनिष्ठाभावप्रतियोगित्वेपिनपक्षत्वेनपरिग्रहः तत्वंयादृशसंबंधसामान्येयत्प्रतियोगिकत्वपदभाववद
नुयोगिकत्वोभयाभावस्तत्संबंधावच्छिन्नतन्निष्ठप्रतियोगिताकत्वंसमवायेनघटत्वेवाच्येताभावप्रतियोगिता न
कत्वं वच्छेदकताघटकसमवायेनघटत्वप्रतियोगिकत्ववाच्यत्वानुयोगिकत्वोभयाभावस्यसत्वादृष्टस्यत्वादे २०

(४०)

संग्रहः एतेन प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यनधिकरणत्वरूपस्य तस्य निवेशे गगने नैमियं ना प्र
स्तीत्यादौ तादृशगगनाधिकरणाप्रसिद्धा गगनस्या संग्रहापत्तिरिति निरस्तः तत्संबंधावच्छिन्न नवच्छेदकत्व
मपि यथाश्रुतेन ग्राह्यं वाच्यत्वनिष्ठप्रतियोगितायां समवायसंबंधावच्छिन्नावच्छेदकत्वस्याप्रसिद्धेः परंतु स्ववृत्ति
त्व न तत्संबंधावच्छिन्नत्वोभयभाववती यद्वाच्यत्वनिष्ठप्रतियोगितायां निरूपितावच्छेदकतात्वकं स्वं व्यधिकरणघ
टत्वादि अत्र घटत्वे पटनिष्ठप्रतियोगितावच्छेदकत्वसाधनाय स्ववृत्तित्वनिवेश व्यधिकरणसंबंधप्रतियोगिता
वच्छेदकीकृत्य घटत्वे घटनिष्ठनिष्ठप्रतियोगितानवच्छेदकत्वसाधनाय तत्संबंधावच्छिन्नत्वस्य निवेशः तथा
चैवं प्रयोगः प्रथमकल्पे वाच्यत्वादिनिष्ठनिरुक्तप्रतियोगिव्यधिकरणाभावप्रतियोगी स्ववृत्तित्व तत्संबंधा
वच्छिन्नत्वोभयाभाववद्वाच्यत्वनिष्ठप्रतियोगितावच्छेदकत्वासामान्यकप्रमाणाभावादिति द्वितीयकल्पे स
मवायित्वं तादृशावच्छेदकतासामान्यकं वाच्यत्वनिष्ठनिरुक्तप्रतियोगिव्यधिकरणाभावप्रतियोगितादिति

२३

बोध्य इति संक्षेपः ननु समवायिनादेर्वाच्यत्वनिष्ठप्रतियोगितावच्छेदकतावगाहि समवायि नयावाच्यत्वं नास्ती
ति प्रत्ययस्यैवमाने तथाच प्रथमकल्पे हेतोः स्वरूपासिद्धिः द्वितीयकल्पे प्रमाणावलात्तन्नावच्छेदकत्वे सिद्धेत
दभावसाधने बाधादिदोष इत्यत स्तन्मन्त्यर्यं निरस्यति तद्विशिष्टज्ञानस्येति प्रतियोगितावच्छेदकीभूतवि
शेषणतावच्छेदकप्रकारकनिश्चयस्येत्यर्थः अभावज्ञानकारणत्वादिति अभावे प्रतियोगितावच्छेदकवि
शिष्टस्य प्रतियोगिनो वैशिष्ट्यावगाहि लौकिकसाक्षात्कारं प्रतिजनकत्वादित्यर्थः प्रतियोगितावच्छेदकवि
शिष्टप्रतियोगिज्ञानस्याभावबुधित्वावच्छिन्नं प्रतिजनकत्वादिति तुनार्थः विशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नं प्रति
विशेषणंतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वस्य क्लृप्तत्वेन तेनैव निर्वाहे पृथक् प्रतियोगितावच्छेदकविशि
ष्टप्रतियोगिज्ञानत्वेनाभावबुद्धित्वावच्छिन्नं प्रति हेतुत्वकल्पने गौरवात् अभावप्रत्ययो हि विशिष्टवैशिष्ट्यबोधमर्या

२३

दांनातिशेत इति नियमेनाभावबुधे विशिष्टवैशिष्ट्यावगाहित्वनियमात् अयंभावः दंडत्वधर्मितावच्छेदककरक्त

त्वप्रकारकनिर्णयमंतरेण रक्तदंडवान् पुरुष इति विशिष्टवैशिष्ट्यबोधनजायत इति सर्वजनसिद्धं तदिह व्यधिकर
णधर्मावच्छिन्नाभावस्वीकर्तृमते समवायिवाच्यत्वं नास्तीत्याकारकस्य भावसाक्षात्कारो वाच्यः तादृशाभावप्रत्यये
च प्रतियोगिप्रकारतापन्नस्यैव प्रतियोगितावच्छेदकत्वावगाहितान् सच्चनसंभवति तेनान्यथाख्यातिस्वीकारेण का
रणीभूतस्य वाच्यत्वत्वधर्मितावच्छेदककसमवायित्वप्रकारकनिर्णयस्यासंभवात् वाच्यत्वं न समवायीति विशेषद
र्शनकालेपि समवायिनि तया वाच्यत्वं नास्तीति प्रतीतेरनुभूयमानत्वाच्च वाच्यत्वाद्यनुयोगिकसमवायित्वाप्रंको
रकं निर्णयं स्यां भावावगाहिन्येवसेति चेन्नहि सर्वत्रैव तथात्वमुपेयतां इष्टापत्तौ गतं व्यधिकरणधर्मस्य प्रतियो
गितावच्छेदकत्वेनेति ननु प्रतियोगिनि प्रकारतापन्नं यत्प्रतियोगितावच्छेदकं तदवगाह्यभावबुद्धावेव तथाज्ञा
नेहेतुः ननु प्रतियोगिन्यप्रकारतापन्नं यत्प्रतियोगितावच्छेदकं तदवगाह्यभावबुद्धौ किंतु तत्तनावद्विशेषणज्ञा
नमस्तं प्रकृते तु प्रतियोगिन्यप्रकारतापन्नस्य समवायित्वस्य स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशेस्वा

२२

तेन्येण विशेषणत्वमुपपत्ते तथा च तत्त्वसमवायित्ववाच्यत्वादीनां विशिष्टलिङ्गोपस्थितेरपेक्षा न तत्कज्ञानस्ये
ति व्यधिकरणधर्मावच्छिन्नाभावस्लौकिकसाक्षात्कारो निराबाध एवेति चेन्न अभावप्रत्यक्षमात्रस्यैव प्रतियो
गिनि प्रकारतापन्नस्यैव प्रतियोगितावच्छे प्रतियोगितावच्छेदकत्वावगाहित्वनियमात् घटो नास्तीत्येव प्रतीतेः
ननु घटत्वेन घटो नास्तीति अन्यथा घटीयोऽभावो घट इत्यादिप्रतीत्यापत्तेः नन्वेतदन्यथानुपपत्त्या वाच्यत्व
त्वधर्मितावच्छेदकसमवायित्वप्रकारकज्ञानमन्यथाख्यातिरूपमेवोपेयत इति चेदस्तु तावच्छेदकविशिष्टप्रति
योगिवैशिष्ट्यावगाहि ज्ञानं भ्रमरूपमेव भविष्यति प्रतियोगितावच्छेदकतायां वैशिष्ट्यव्याप्यतया भ्रमे वैशिष्ट्य
बाधेनावच्छेदकताया अपि बाध एवेति मन्तव्यं ननु विशिष्टस्य वैशिष्ट्यमिति रीत्याभावस्लौकिकप्रत्यक्षं नाङ्गी
क्रियते कुतस्तत्र विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वं अभावप्रत्यये हि विशिष्टे वैशिष्ट्यमर्यादा ना
तिशोन इत्यस्याभावस्लौकिकसाक्षात्कारः विशिष्टवैशिष्ट्यमर्यादा अभावे प्रतियोगितावच्छेदकविशिष्टप्रति

२२

(४४)

योगिनः प्रतियोगितारव्यवैशिष्ट्यविषयतां नातिशेते न जहातीति नार्थः किंतु प्रतियोगितयावस्कन्नः किंचिद्विष
मेविशिष्टस्य वैशिष्ट्यविषयतामित्यर्थः तथा च न तादृशनियमबलेन तस्य तद्रूपत्वं सिध्यतिपरं तु प्रतियोगि
तावच्छेदकयोरुभयज्ञानमात्रमभावलौकिकप्रत्यक्षे हेतुरिति व्यधिकरणधर्मावच्छिन्नाभावसिद्धिरिति
त्यत आह अन्यथेति अभावलौकिकप्रत्यक्षं प्रतियोगिप्रतियोगितावच्छेदकोभयज्ञानमात्रस्य हेतुत्वमित्यर्थः
निर्विकल्पकादर्शीति घटघटत्वयोर्निर्विकल्पकज्ञानानन्तरमपीत्यर्थः घटो नास्तीति प्रतीत्यापत्तेरिति विशेष
णतावच्छेदकप्रकारकविशेषणज्ञानाभावे न विशिष्टवैशिष्ट्यज्ञानात्मकप्रत्यक्षासंभवेपि केवलं विशेष्ये विशे
षणमिति न्यायेन घटो नास्तीति प्रत्यक्षापत्तेरित्यर्थः ननु भावलौकिकप्रत्यक्षं प्रति विशेषणज्ञानस्य कारण
त्वे विशेषदर्शिनामपि शशशृङ्गीयत्वावच्छिन्नशृङ्गनिष्ठप्रतियोगिताव हत्याविगविशशशृङ्गे नास्तीति प्रतीतेः कारणा
।तिरित्यत आह गविशशशृङ्गं नास्तीति प्रतीतेरसिद्धेरिति शशीयत्वेनोष्ट्रनिवेशं गाभावप्रतियोगितावच्छेदकता

वगाहित्वाः प्रतीतेरसिद्धेरित्यर्थः एकतरसिद्धप्रतीतित्वेन सामग्र्याः कारणताभावकल्पनापेक्षयोभयसि
द्धाभावविषयकसकलप्रतीतिसामान्याभावेन तादृशप्रतीत्यभावकल्पनमेवोचितमिभावः ननु विशेषदर्शि
नो तादृशप्रतीत्यभावेपि केवलशशशृंगं नास्तीति प्रतीतेस्सकलजनसिद्धायाः का गतिरित्यत आह शश
शृंगं नास्तीति प्रत्ययेत्यर्थः अर्थः विषयः तथा च तादृशप्रत्ययस्य नञ्व्यधिकरणधर्मावच्छिन्नाभावसाधकत्वं श
शनिष्ठशृंगाभावविषयकत्वेनैवोपपत्तेरिति भावः ननु तथाप्यत्यंताभावबोधनियामिकायाऽनुयोगिवाचक
पदोत्तरसप्तम्या भावस्य शशशृंगं नास्तीति शब्देन कथं तादृशो बोध इति चेन्न तादृशशब्दबोधाभावेपि प
दार्थोपस्थित्यादिसत्त्वेन तादृशमानसबोधजननेनेत्यया उत्पन्नानां तथा प्रयोगसंभवादित्यभिप्राय
इत्यन्यत्र विस्तरः प्रकारांतरेण व्याप्तिलक्षणमाशंक्य निराकरोति अथेत्यादिना साध्यसामानाधिकर
ण्यं साध्याधिकरणवृत्तित्वं अनधिकरणत्वं अधिकरणतया निवेशे प्रयोजनाभावात् विशेषणतया विशेषेण

(४९)

तद्वत्तात्वाभाव साधिकरणत्वमिति केचित् वस्तुतस्तु साध्याधिकरणावृत्तित्वाभाववत्वं साध्याधिकरणवृत्तित्वमे

व तदभावाभावस्य तत्स्वरूपत्वात् विशेषणता तथा च साध्यसामानाधिकरण्यत्वे सति साधिकरणत्वं तत्वमि व

ति लब्धं एवं च धूमवान् वन्हे रित्याधिकरणमिति यावत्तु ॥ दवति व्याप्तिरित्यधिकरणत्वं प्रवेशान्त्यावश्यकं त

स्य प्रवेशे च न तथा साध्यसामानाधिकरण्यं यत्र तत्तु साध्यसामानाधिकरण्यं साध्यसामानाधिकरणमिति

यावत् तादृशं यदधिकरणत्वं तस्य प्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकाभाव इत्यर्थः स्य तादृशवावो

तत्वाभात् इत्थं च साध्यसामानाधिकरणाधिकरणता प्रतियोगित्वाभावः फलित इति न चैवं निरधिकर

ण इत्यादि ग्रंथविरोधः गगने सामानाधिकरण्याभावप्रसिद्धेरनुपयोगादिति वाच्यं ननु केवलान्वयिनि स

र्वेषामेव साध्यसामानाधिकरणतया साध्यसामानाधिकरण्यस्यापि केवलान्वयित्वात्कथं तदभावप्रसिद्धिरि

त्याशंकया तदवतारणे तद्विरोधाभावात् न चैवमपि केवलान्वयिनि साध्यसामानाधिकरणाधिकरणतेषाम

(४८)

२४

ख

सिद्धेसव्याप्तिनादवस्थ्योगगनादौ तत्प्रसिध्यभिधानस्य किं चित्करत्वैवस्यादिति वाच्यं हेतुतावच्छेदकसंबंधाव
च्छिन्नाधिकरणतीयस्वरूपसंबंधेन साध्याधिकरणावृत्तित्वस्य हेतुविवक्षणात् तादृशी चाधिकरणता गगना
देः कालिकसंबंधावच्छिन्नाधिकरणतैव सुलभा न चैवं तस्य निरधिकरणताभिधानविरोधः तस्याप्युक्तसंबंधे
नाधिकरणतानिरूपकपरतया समंजस्यात् साध्याधिकरणे संबंधविशेषणावृत्तित्वनिवेशस्य परेषामप्या
वश्यकत्वात् अन्यथा कालिकादिसंबंधेन गगनादेरपि साध्याधिकरणे वृत्तितया केवलान्वय्यादावव्याप्त्या
द्यापत्तेः तत्र साध्याधिकरणवृत्तित्वस्य हेतुतावच्छेदकसंबंधेनावच्छिन्नाधिकरणतीयस्वरूपसंबंधेन निवेशे
ऽधिकरणत्वांशस्य सार्थक्यसंभवात् अत एव चाधिकादिग्राह्यतादृशाधिकरणतायामेतद्विशेषणा
योग इति परास्तं न चैवमीदृशसंबंधांतरावच्छिन्नाधिकरणताप्रतियोगिनिरूप्यमादावव्याप्तिः हेतुतावच्छे
दकसंबंधावच्छिन्नाधिकरत्वीयप्रतियोगितासंबंधावच्छिन्नप्रतियोगिताकोक्ताधिकरणत्वाभावस्यान्यथा

२५

(४८)

वाविवक्षणात् नचैवं द्रव्यं विशिष्टसत्तादित्यत्रा व्याप्तिः तादृशाधिकरणतायां हेतुतावच्छेदकानवच्छेदकत्व
हेतुतावच्छेदकसंबंधावच्छिन्नत्वोभयाभावस्यापि सत्त्वादिति इत्थं च गगनेऽतिप्रसंगवारणाय साधिक
रणत्वेनत्वं च हेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपकतावच्छेदकहेतुतावच्छेदकवत्त्वमिति
ध्येयं यथाश्रुते साध्यसामानाधिकरण्यपदार्थविकल्प्य लक्षणं दूषयति साध्यसामानाधिकरण्यं ही
ति साध्यानधिकरणाधिकरणत्वं साध्याधिकरणतावच्छिन्नभेदवद्वृत्तित्वं साध्याधिकरणानधिकरण
त्वं साध्याधिकरणावृत्तित्वं तत्राद्ये दूषणमाह केवलान्वयीति अप्रसिद्धेति शेषः द्वितीये दूषणमा
ह यत्किंचिदित्यादि अत्र च साध्यानधिकरणत्वस्य दूषणं लक्षणतो यावंतोः योऽसंभवति नावतो दूषण
षणसांप्रदायिकामित्यभिप्रायेणेति बोध्यं दीधितिकृतस्तु साध्यस्यासामानाधिकरण्यं ये धितिन्युसत्वा
साध्यवदवृत्तयोधर्मो लभ्यं तेते षाधिकरणत्वं केवलान्वयिनि साध्यवदवृत्तिगगनाधिकरणाप्रसिद्धात

(४८)

२५

दधिकरणत्वमप्यंतेऽव्याप्तमितितदभाववत्वं मात्रं तदर्थः तस्मिन् सति साधिकरणत्वं तदवच्छिन्नाधिकरणताक
त्वे सतिसमन्याप्यावच्छेदकत्वस्याभावात् तेचेहान्यूनवृत्तित्वं एवं चसाध्यवदवृत्ति सकलपदार्थाभाववत्वं यदधिकर
णतान्यूनवृत्तितत्वमितिफलितान्तार्थः धूमवान् वन्हेरित्यादौधूमवदवृत्तित्वलताभावस्य वन्ह्यधिकरणताव्या
पकत्वादतिव्याप्तिवारणाय सकलेति अन्यूनवृत्तित्वनिवेशाद्धूमवदवृत्तिपदार्थाभाववत्वस्य धूमाधिकरणता
स्वन्येऽयोगोलकसत्वेपि वन्हिमान् धूमादित्यादावव्याप्तिः वन्हिमान् धूमादित्यादौ कालिकसंबंधेन हेतु
मतिस्पंदे साध्यवदवृत्तिस्पंदत्व प्रमाविषयत्वादेः सत्वादव्याप्तिवारणाय हेतुतावच्छेदकसंबंधेन हेत्वधिकरणत्व
व्यापकसाधिकरणत्वपदं साध्यवदवृत्तित्वं तु विशेषणताविशेषेणैववाच्यं तेनकालोघटवान् प्रमेयत्वादित्या
दौ साध्यतावच्छेदकसंबंधेन साध्यवदवृत्ति रवृत्तिरेव तदभावस्य हेत्वधिकरणताव्यापकत्वेपि नातिव्याप्तिरितिप्रा
हुः नापीति स्वहेतुतावच्छेदकावच्छिन्नं साध्यसामानाधिकरण्यं साध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकरण्यं
तथा च हेतुतावच्छेदकावच्छिन्नहेतुसमानाधिकरणात्यंताभावाप्रतियोगियत्साध्यतावच्छेदकावच्छिन्नं तत्सामानाधि

२५

(५०)

करण्यमव्यभिचरितत्वमित्यर्थः तेन यावत्साध्यनिरूपितयावत्साधननिष्ठव्याप्तौ नः सामानाधिकरण्ययोरेवव्याप्तौ
वक्ष्यमाणदूषणासंगतेः हेतुतावच्छेदकेत्यादिविवक्षयाः प्रयोजनं तत्कप्रायं प्रतियोगित्वादिति तथाच वह्निमा
न्धूमादित्यादावव्याप्तिरितिभावः नन्वप्रतियोगिपदेन साध्यतावच्छेदके प्रतियोगितावच्छेदकत्वाभावो वाच्यः प
र्वतीयवन्ह्यभावप्रतियोगितावच्छेदकतानुतच्छुद्धवह्नित्वेनेनाव्याप्तिरित्यत आह द्रव्यत्वादेरिति संयोगिद्रव्यत्वा
दित्यादावव्याप्त्यापत्तेरित्यर्थः प्रतियोगिविरोधित्वं प्रतियोग्यधिकरणावृत्तित्वं तथाच संयोगाभावस्य तत्त्वेनाभा
वांतरमादायाव्याप्तिवारणमितिभावः ननु प्रतियोग्यधिकरणावृत्तित्वं प्रतियोगिमत्ताग्रहविरोधिता नियामकसंबंधेना
ऽभावस्य वाच्यं अन्यथा धूमवान् वह्नेरित्यादौ वह्निधूमाभावस्य कालिकतया धूमवद्वृत्तित्वेन लक्षणाघटनयाऽतिव्याप्तेः
दृष्टं च सत्ताभाववान् प्रमेयत्वादित्यादावतिव्याप्तिः तेन संबंधेन साध्यवति सामान्ये वृत्तित्वाप्रसिद्ध्याऽभावस्य लक्षणा साध्या
घटकत्वादित्यत आह व्याप्यवृत्तित्वं चेति अभावविशेषणं हेतुसमानाधिकरणाभावविशेषणं व्याप्यवृत्तित्वं च स्वसामाना

२६

धिकरणात्यंताभावप्रतियोगित्वं प्रतियोगिना चात्रैव विशिष्टव्याप्यस्य वृत्तिधर्मानवच्छिन्नाधारत्वात्तेन तद्भिन्नत्वावच्छिन्नाभाव
मादाय न दोषः अवच्छिन्नवृत्तिकान्यत्वं वा अन्ये कालिकत्वाभावप्रसंगादिति संयोगाभावस्यान्यथात्वेन नाद्वृत्त्यघटत्वाभा
वमादाय हेतोरव्यभिचारित्वं स्यादित्यर्थः ननु प्रतियोगिसामानाधिकरण्यासामानाधिकरण्यव्याप्यवृत्तित्वाव्याप्यवृत्ति
त्वरूपविरुद्धधर्माध्यासाद्गुणवृत्तिसंयोगाभावाद्भिन्न एव स्वीक्रियते तथा च तत्र नातिव्याप्तिरित्याशंक्यां निषेधति न
हीत्यादिना विरोधीत्यनंतरं व्याप्यवृत्तिरिति शेषः अपर इति प्रतियोग्यविरोध्यव्याप्यवृत्तिसंयोगाभावादन्य इत्यर्थः प्र
माणाभावादिति शेषः न चोक्तविरुद्धधर्माध्यास एव भेदक इति वाच्यं सामान्यतः प्रतियोगिसामानाधिकरण्यासामानाधि
करण्ययोः प्रतियोग्यधिकरणीभूतद्रव्यवृत्तित्वप्रतियोग्यनधिकरणीभूतगुणादिवृत्तित्वयोर्वा सामान्यतो व्याप्यवृत्तित्वाव्या
प्यवृत्तित्वयोः स्वाधिकरणीभूतद्रव्यनिष्ठात्यंताभावप्रतियोगित्वस्वाधिकरणीभूतगुणादिनिष्ठात्यंताभावाप्रतियोगित्वयोर्वा
भेदकत्वं नास्माकं तयोर्विरुद्धधर्माध्यासासिद्धेः सामानाधिकरण्यप्रतियोगित्वयोर्व्याप्यवृत्तित्वेन सामान्यैरित्यत्र तदभावान न
भ्युपगमात् तद्भिन्नाय त्वनुयोगितावविरोधासिद्धेः सहिपरस्पराभावरूपतया परस्परविरहव्यापकतया वा स्यात् नचैवं प्रकृत इति

२६

१ ननु नयोर्भेदकत्वासंभवे प्यधिकरणभेदस्याभावानां भेदकोस्त्वित्यत आह अधिकरणेति भेदाभावादिति तथा सत्यधिकरणापे

क्षणातिरिक्तभावत्वघटितत्वादिति भावः १

भावः एवमधिकरणानामनेकत्वेपि नाभावस्यानेकत्वं किंतु यत्राभावे विरुद्धधर्माध्यासस्तयोरेवानेकत्वं शंकितं

इदनीं त्वधिकरणभेदेनेति नातिरिक्ताभावं एवं न सिंध्येदिति भेद इति मंतव्यं केचित्तु नन्वधिकरणभेदेनाभाव

भेदवादिमते गुणादौ द्रव्यवृत्तिसंयोगाभावभिन्नः संयोगाभावः स्वीक्रियते स एव प्रतियोग्यधिकरणावृत्तिर्हि तु स

मानाधिकरण इति न तत्रातिव्याप्तिरित्यत आह नहीत्यादीत्याहुः अत्यंताभावघटितलक्षणं दूषयित्वान्यो

न्याभावघटितलक्षणमपि दूषयितुमाशंकते नापि साधनेति साधनवन्निष्ठान्योन्याभावाप्रतियोगी साध्यवान् य

स्य साधनस्य तत्त्वमित्यर्थः तदन्योन्याभावस्य संयोगवदन्योन्याभावस्य तत्र संयोगवति तथा च तत्रैवाव्याप्तिरिति

भावः एवं संयोगवति संयोगवदन्योन्याभावस्वीकारे भेदाभेदः भेदसहितोऽभेदः मध्यमपदलोपिसमासः एका

धिकरणवृत्तित्वमेव साहित्यं तथा च विरुद्धयोर्भेदाभेदयोरेकत्र समसत्त्वेपि मूल इवाग्रे महीरुहो न कपिसंयोगीति प्रती

तिः स्यादिति भावः अवच्छेदकभेदेनेति तथा च अग्रावच्छेदेन संयोगिभेदानभ्युपगमान्नैतादृशप्रत्ययकाश इति

२७

भावः ननु भेदस्य व्याप्यवृत्तित्वे नैवं दोषः स्वप्रतियोग्यनिरूपितहेत्वधिकरणवृत्तित्वविशेषणवैयर्थ्यमतो दूषणान्तरमाह साध
नवन्निष्ठेत्यादिना अन्वयस्य साधनस्य साध्यवानु साधनवन्निष्ठान्योन्याभावाप्रतियोगीति वाक्यार्थे षष्ठ्यर्थः संबंधः
सच व्याप्यव्यापकभाव एव तस्य च सध्येऽन्वयः ननु साध्यवतानेन सह साधनस्य व्याप्यव्यापकभावस्य बाधितत्वात्
नन्वेनावता किमायातमित्यत आह व्याप्यव्यापकभावस्येति व्याप्यस्य व्यापके भावः सत्वसंबंध इति यावत् अत्र
निरूपणादिति स्वस्वनिष्ठव्याप्तिनिरूपकत्वरूपस्य व्याप्तिग्रहात्पूर्वं ज्ञातुमशक्यत्वात् तथा चात्माश्रय इति भावः
त नच साध्यसाधनयोस्संसर्गविधया व्याप्तिप्रवेशे व्याप्तिग्रहात्प्राक् व्याप्तेर्ज्ञानेपि न क्षतिरिति वाच्यं तथापि
विषयानवस्थाया दुर्वारत्वादि भावः ननु साध्यसाधनयोस्संबंधस्सामानाधिकरण्यरूप एव न तु व्याप्यव्यापक
भावस्साधनस्य साध्यवन्नवृत्तित्वे तु तेन सह साधनस्याधिकरणत्वमेवेति नात्माश्रय इत्यतः प्रकारान्तरेणात्म
श्रयमाह साध्यसाधनयोरिति भावप्रधानो निर्देशः तथा च प्रकृते व्याप्तिलक्षणघटकयोस्साध्यत्वसाधनत्व

२७

(५५)

योऽव्याप्तिप्रतियोगित्वानुयोगित्वरूपयोज्ञानं विनाप्रकृतव्याप्तिज्ञानासंभवेनात्माश्रय इति भावः ननु प्रकृते साध्य
त्वं सिद्धिकर्मत्वं साधनत्वं तत्कारणत्वं न तु व्याप्त्यनुयोगित्वादिकमुच्यते यद्वा यत्सामानाधिकरणान्योन्याभावप्रति
योयद्वत्तेन समं तस्य सामानाधिकरण्यं व्याप्तिरिति तल्लक्षणं निर्वाच्यमतो नात्माश्रय इत्यत आह वह्नि
मदिति ननु यादृशरूपावच्छेदेन यत्सामानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वाभावस्तस्य तादृशरू
पावच्छिन्नसामानाधिकरण्यं तादृशरूपावच्छिन्ननिरूपिता व्याप्तिरिति विवक्षणीयं वह्निमान्धूमादित्यादौ शुद्ध
वह्नित्वावच्छेदेन न तत्तद्वह्निमदन्योन्याभावप्रतियोगितावच्छेदकत्वं किंतु तत्तद्वह्नित्वावच्छेदेन धूमवान्वह्निमा
नित्यप्रतीतेरिति नाव्याप्तिरित्यत आह विशेषेति तत्तद्वह्निमद्भेदसमुदायादेवेत्यर्थः स्वकेरण वह्निमान्नेति प्रतीति
विषयाभावे तत्तद्विशेषाभावकूटातिरिक्तत्वव्यवच्छेदः तेन सिध्यसिद्धिभ्यां व्याघातः सामान्यव्यवहारोपपत्तौ सामा
न्याभावे समान्याभावत्वेन विशिष्टस्य विशेषाभावभिन्नत्वे मानाभावादिति न याच धूमसमानाधिकरणतत्तद्वह्नि

२८

मद्भेदप्रतियोगितावच्छेदको वह्नित्वावच्छिन्नो वह्निरिति भवत्यव्याप्तिरिति भावः अधिकमग्रे वक्ष्यामः लक्षणान
रं निराकरोति नापि साधनसामानाधिकरण्या वर्धर्मेति साधनसामानाधिकरणा यावन्तो धर्मास्तेषां प्रत्येक
निरूपितं यद्वैयधिकरण्यं तदनधिकरणसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः अत्र वैयधिकरण्यं तदनधिकरणा
वृत्तित्वं प्रमेयत्वादेरित्युत्तरग्रन्थसंगतेः किंतु तदनधिकरणवृत्तित्वं तदभावाधिकरणत्वं वा तत्त्वं पृथिवी द्रव्यत्वादि
त्यादौ द्रव्यत्वानधिकरणगुणवृत्तित्वस्य गुणत्वादिनिष्ठस्यानधिकरणत्वं पृथिवीत्वे साध्ये वर्ततेऽतिव्याप्तिप्रसंजकम
तआह साधनसमाधिकरणेति यावद्धर्मविशेषणं वह्निमान् धूमादित्यादौ धूमसमानाधिकरणानां पर्वतत्वम
हानसत्वादीनामैकाधिकरण्याप्रसिद्धावपि प्रत्येकाधिकरणत्वस्यैव प्रकृते विवक्षितत्वेन तेषां प्रत्येकनिरूपि
त वैयधिकरण्यस्य जलत्वादिनिष्ठस्यानधिकरणं वह्निरिति लक्षणसमन्वयः व्यभिचारिण्यतिव्याप्तिवारणाय
यावदिति वैयधिकरण्यनिवेशप्रयोजनं तु वक्ष्यमाणलक्षणेन सहाभेदनिरास एवेति बोध्यं न च द्रव्यं पृथिवीत्वादित्या

२८

न

दाव्व्याप्तिः साधनसामानाधिकरण्यावधर्मानंपाति पटत्वघटत्वानधिकरणघटपटादिवृत्तिता द्रव्यत्वस्येति वाच्यं
तादृशधर्मानधिकरणमात्रवृत्तित्वस्य विवक्षितत्वात् द्रव्यत्वस्य तादृशघटत्वाद्यनधिकरणमात्रवृत्तित्वात् न चैवमपि रू
पवान् पृथिवीत्वादित्यादावव्याप्तिस्तादृशघटत्वाद्यनधिकरणमात्रवृत्तित्वाद्रूपस्येति वाच्यं साध्यतावच्छेदके तादृश
धर्मानधिकरणमात्रवृत्तितानवच्छेदकत्वस्य विवक्षितत्वात् तत्तद्रूपत्वस्यैव तन्मात्रवृत्तितावच्छेदकत्वेन रूपत्वस्यानवच्छे
दकत्वात् तदधिकरणमात्रवृत्तित्वं च साध्यतावच्छेदकसंबंधेन बोध्यं अन्यथा धूमवान् वन्हेरित्यादौ तादृशायोगो
लकत्वानधिकरणमात्रवृत्तित्वस्य धूमेऽभावेनाऽतिव्याप्त्यापत्तेः न चैवं वन्हिमान् धूमादित्यादावव्याप्तिः तादृशयाव
दंतर्गतद्रव्यत्वानधिकरणगुणादौ साध्यतावच्छेदकसंबंधेन वृत्तेरप्रसिद्धेरिति वाच्यं यत्नावच्छेदकत्वमिह ज्ञानतिरिक्तवृ
त्तित्वं न तु तन्न्यूनवृत्तित्वं तथा सति धूमवान् वन्हेरित्यादौ तादृशयावदंतःपातयोगोलकत्वानधिकरणमात्रवृत्तित्ववति नो
कादौ धूमत्वस्य विरहेणातिव्याप्त्यापत्तेः तच्च तादृशवृत्तित्वाभाववद्धर्मावृत्तित्वं वृत्तित्वाभावश्च साध्यतावच्छेदकसंबंधाव

२९

छिन्नवृत्तित्वीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकस्य वक्तव्यत्वे प्रकृते च गुणसमवेतत्वस्य तेन संबंधेनाभावाप्रसिद्ध्यादौ व
त्तेतरवृत्तिताव्याप्तिः द्रव्यवान् सत्त्वादित्यादौ सत्तासमानाधिकरणगुणत्वानधिकरणमात्रवृत्तित्वाभाववति गगने द्रव्यत्व
स्य वृत्तित्वेनातिव्याप्तिवारणाय धर्म इति साध्यतावच्छेदकसंबंधेन संबंधीत्यर्थः तेन कालिकसंबंधेन गगनस्य वृत्तित्वेपि
न क्षतिः ननु तथापि संयोगेन द्रव्ये साध्ये सत्तारूपहेतावतिव्याप्तिः सत्तासामानाधिकरणघटत्वानधिकरणमात्रवृत्ति
तद्भिन्ने घटपटसंयुक्तदंडे द्रव्यत्वस्य सत्त्वात् गुणत्वानधिकरणमात्रवृत्तितद्भिन्नस्य साध्यतावच्छेदकसंबंधेन वृत्तिमतो
ऽप्रसिद्ध्या गुणत्वमादायातिव्याप्तिवारणासंभवादिति चेन्न यद्धर्मावच्छेदेन तादृशधर्मानधिकरणमात्रवृत्तितद्भि
न्नत्वसाध्यतावच्छेदकसंबंधेन वृत्तित्वोभयाभावस्तत्त्वस्य विवक्षितत्वात् प्रकृते च द्रव्यत्वावच्छेदेनोभयाभावस्य सत्त्वेनाऽति
व्याप्तेरभावात् यत्तु तादृशधर्मानधिकरणमात्रवृत्तित्वमित्यस्य तादृशयावद्धर्मानधिकरणत्वे वृत्तित्वे सति तादृशध
र्मानधिकरणवृत्तित्वमिति नार्थः विशेष्यदलनिवेशप्रयोजनाभावात्परं तु तथाविधावृत्तित्वमात्रं तथा च तत्तद्धर्मानि

२९

(४५)

वेशेऽतिव्याप्तेरनवकाशः गगनादौ तथाविधावृत्तित्वाभावाभावादिति धर्मपदघटितं तथाविधावच्छेदकत्वनिर्वचनं निर
र्थकमेवेति तदसत् यत्नोविशेष्यदलानिवेशे तादृशधर्मानधिकरणतदवृत्तित्वे तादृशधर्माधिकरणावृत्तित्वमेवला
घवात् तथाच प्रमेयत्वादेरिति स्फुटा संगतिः किंच तादृशधर्मानधिकरणवृत्तित्वप्रतियोगिकाभावोतिप्रसंजकः ता
दृशधर्मानधिकरणेतरवृत्तित्वत्वावच्छिन्नाभावस्य प्रसिद्धेः लाघवेन तादृशाभावप्रतियोगितायास्तादृशधर्माधिक
रणवृत्तित्वेनैवावच्छेदात् अपिच तादृशधर्माधिकरणेऽवृत्तित्वप्रतियोगिवृत्तित्वं तत्तत्संबंधसामान्येन नवा यत्किं
चित्संबंधेन व्यभिचारिण्यतिव्याप्तेः व्यभिचारनिरूपकाधिकरणे कालिकसंबंधेन साध्यस्य वृत्तित्वात् नापि साधन
तावच्छेदकसंबंधेन समवायेन द्रव्यत्वसाध्ये संयोगेन धूमहेतुतावव्याप्तेः असंयुक्तत्वप्रतियोगिनः संयुक्तत्वस्याधि
करणे साध्यतावच्छेदकस्यावृत्तित्वात् किंतु साध्यतावच्छेदकसंबंधेनैव तादृशवृत्तित्वं वक्तव्यं एवं च साध्यतावच्छेदकसंबं
धेन तादृशावृत्तित्वप्रतियोगिनस्तादृशधर्माधिकरणवृत्तित्वस्याधिकरणेऽवृत्तित्वमेव तादृशावच्छेदकत्वमिति फलि

३०

तेदृशं च संयोगेन द्रव्ये साध्ये सत्तादिरूपहेतावतिव्याप्तिः व्यभिचारकालिकाधिकरणगुणादौ संयोगसंबंधेन वृत्तेरप्रसिद्धेः
असंयुक्तप्रतियोगिनस्साधनसामानाधिकरणपर्वतत्वाद्यधिकरणसंयुक्तत्वास्याधिकरणेऽवृत्तितो घटत्वादेरे
वतादृशावच्छेदकत्वसंभवात् न च वृत्तित्वप्रतियोगियद्वृत्तित्वं तत्संबंधसामान्येनैव पुनस्तत्वा वाच्यं साध्यतावच्छेदकसंबं
धावच्छिन्नवृत्तित्वीयस्वरूपसंबंधेनैव पुनस्तदभावो वाच्य इति नाप्रसिद्ध्यवकाश इति वाच्यं उक्तस्थलेऽतिव्याप्तेरपरिहा
रात् तत्संबंधावच्छिन्नतादृशवृत्तित्वाभावस्य केवलान्वयितया पुनस्तदभावाप्रसिद्ध्या तदभावाभाववद्वृत्तित्वरूप
स्य तादृशावच्छेदकत्वस्य साध्यतावच्छेदकेऽसंभवात् न स्यात्तादृशाभावविशिष्टतादृशधर्मानधिकरणवृत्तित्वमेव तत्त्वा
वच्छिन्नत्वं वाच्यं एवं चोक्तस्थले तादृशाभावकेवलान्वयित्वेपि तादृशाभावविशिष्टतादृशधर्मानधिकरणवृत्तित्वस्य मेय
त्वविशिष्टघटस्यैव व्यतिरेकितया नातिव्याप्तिसंभव नापि इत्थं च समवायेन द्रव्ये साध्ये सत्त्वादावतिव्याप्तिवारणाय धर्मपद
मर्थवत् संबंधसामान्येनैव गगनादीनामवृत्तित्वेन गमनादृशाभावविशिष्टस्य कालिकसंबंधावच्छिन्नस्य तादृशधर्मानधि

३०

करणवृत्तित्वस्य गगनादिसाधारण्यात्स्वधर्मेपदं नर्थकमिति शंकाया नावकाशः ननु तदधिकरणावृत्तेस्तदधिकरणवृत्त्य
भावप्रतियोगित्वनियमेन तादृशधर्माव्यापकप्रतियोगिव्यधिकरणाभावप्रतियोगित्वमेव प्रकृते तादृशधर्मानधिक
रणे न तादृशवृत्तित्वमुच्यते गगनाभावादिसधारणं प्रतियोगिवैयधिकरण्यं तन्न निवेश्यत इति न कापि क्षतिरिति धर्मेपद
मनर्थकमेवेति चेत्तर्हि तद्देपेक्षया लाघवात्तादृशधर्मव्यापकभेदप्रतियोगितावच्छेदकत्वमेव तत्त्वमस्तु तत्र धर्मेपदा
निवेशे चोक्तस्थले उक्तिव्याप्तिरिति न च तन्निवेशनमर्थवत् धूमसमानाधिकरणयान्यधर्मो न गगनद्रव्यत्वसमानाधि
करणभेदप्रतियोगितावच्छेदकत्वस्य वह्नौ सत्त्वेन वह्नित्वादेरवच्छेदकत्वापत्तिवारणायातादृशधर्मव्यापकत्वं भेदे विशे
षणं धर्मेतापेक्षया गगनाभावादिसाधारणप्रतियोगिवैयधिकरण्यस्य गुरुशरीरत्वादिति न किंचिदेतत् न च गुणकर्मा
न्यत्वविशिष्टसत्तावान् जातेरित्यादावव्याप्तिः तादृशगुणत्वानधिकरणमात्रवृत्तिता श्रन्ये सत्वे साध्यतावच्छेदक
स्य सत्त्वादिति वाच्यं तादृशधर्मानधिकरणमात्रवृत्तियद्धर्मावच्छिन्नाधिकरणतात्वस्य विवक्षितत्वात् एवं तादृशा

६१

३१

धिकरणतायांसाध्यतावच्छेदकसंबंधावच्छिन्नाधिकरणतीयस्वरूपसंबंधानवच्छिन्नत्वसाध्यतावच्छेदकसंबंधेनयत्किं
चिदधिकरणवृत्तित्वोभयाभाववत्वमपिबोध्यं अन्वयेनसंबंधेनयद्धर्मावच्छिन्नाधिकरणतातादृशीतेनतेनसंबंधेन
तद्धर्मावच्छिन्नप्रकारकज्ञानभिन्नेसाध्यतावच्छेदकसंबंधेनयत्साध्यतावच्छेदकावच्छिन्नप्रकारकज्ञानंतत्साध्यता
वच्छेदकेत्यादिरीत्यावानिष्कृष्टलक्षणंबोध्यं एतेनतादृशाधिकरणतायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वंवाच्यं
अन्यथाधूमवान्वह्नेरित्यादौधूमादिकरणतायाःसंबंधसामान्येनायोगोलकादावपिसत्वेनातिव्याप्तेः इ
त्थंचमहाकालोघटवान् कालपरिमाणादित्यादावव्याप्तिःतादृशधर्मानधिकरणेनेनयद्धर्मावच्छिन्नाधिक
रणतातादृशधर्मस्यैवाप्रसिद्धेरितिनिरस्तं तादृशधर्मानधिकरणमात्रवृत्तिसमवायसंबंधावच्छिन्नशब्दादिकरणता
यांनिरुक्तोभयाभाववत्वेनाव्याप्तेरभावादितिसंक्षेपःप्रमेयत्वादेरिति तथाचासंभवइतिभावः ननुव्यतिरेकि
तेनधर्मोविशेषणीयःव्यतिरेकित्वंचान्योन्याभावप्रतियोगितावच्छेदकत्वमित्यआह महानसादाविति समवायि

४२

तयासमवायेन तथाचवन्हिमान्धूमादित्यादौसाधनसमानाधिकरणयावदंतर्गतस्यवन्हेस्समवायेनाभाववति तदधिकरणभिन्नेमहानसादौसत्वेन तादृशसाध्यसामानाधिकरण्याभावादव्याप्तिरितिभावः धूमाद्वित्यादिनाशब्दवान् गगनत्वादित्यादिपरिग्रहः तत्रसाधनसामानाधिकरणयावदंतर्गतस्यशब्दस्यकालिकसंबंधेनयदधिकरणं तद्भिन्नमात्रवृत्तित्वादव्याप्तिरिति अत्रापिकारेणयथाश्रुतपरिष्कृतलक्षणस्यविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेस्समुच्चयः अन्वयेनसंबंधेनहेतुसमानाधिकरणत्वंधर्मीस्यतेनसंबंधेनहेतुसमानाधि० तदनधिकरणत्वविवक्षायां नोक्तस्थलेऽव्याप्तिरितिमंतव्यं आचार्याणांलक्षणंदूषयितुमाशंकते अथेति अनौपाधिकः उपाध्यभावविशिष्टः वैशिष्ट्यंचैकाधिकरणवृत्तित्वं संबंधः साध्यसामानाधिकरण्यं तथाचौध्यभावसमानाधिकरणसाध्यसामानाधिकरण्यंव्याप्तिरितिवाक्यार्थः वन्हिमान्धूमादित्यादौसाधने उपाधेरभावाल्लक्षणसंगतिः धूमवान् वन्हेरित्यादौसाध्यसामानाधिकरण्यस्यसत्वादतिव्याप्तिवारणायसा

पा ति २

ध्यसामानाधिकरण्ये उपाध्यभावसामानाधिकरण्यं विशेषणं विरुद्धे हेतौ विरुद्धत्वज्ञानकाले व्यभिचाराभाव
ज्ञानकाले उपाध्यभावज्ञानावश्यंभावेन ज्ञानातिप्रसंगवारणाय साध्यसामानाधिकरण्यपदं व्यभिचारस्य व्या
पकसामानाधिकरण्यघटितत्वे तु व्यभिचारे चावश्यमुपाधिरिति न्यायेन व्यभिचाराभावेनोपाध्यभावसत्वाल्ल
क्षणातिप्रसंगवारणायैव तदुपादानमिति मंतव्यमित्याहुः वस्तुतस्तु संबंधपदस्य वृत्तिमत्वाभिप्रायकतया साध्य
व्यापकस्य व्यभिचारितासंबंधावच्छिन्नाभावरूपनिष्कृष्टलक्षणे वन्ह्यादिसाध्यकगगनादिहेतावतिव्याप्तिवारणायैव
तदुपादानं संभवतीति विभावनीयम् नन्वाचार्यमते उपाधिः साध्यसमव्याप्त एव तत्र व्याप्तिरनौपाधिकत्वं तदपि
साध्यसमव्याप्तस्य व्यभिचारितासंबंधावच्छिन्नप्रतियोगिताकाभाव एव अन्यस्य व्याप्तित्वे तस्यैव लाघवादनुमित्यौप
यिकत्वसंभवेनार्थांतरापत्तेः इत्थं चात्माश्रय इति प्रकृतोपाधिपदस्य साध्यव्याप्तघटितार्थकतामाह उपाधिश्चे
त्यादिना अथवा नन्वाचार्यमते उपाधित्वं साध्यसमव्याप्तत्वं तद्घटकं साध्यव्यापकत्वं च साध्यनिरूपितव्याप्त्याश्रयत्वं

[OrderDescription]
,CREATED=16.10.20 11:48
,TRANSFERRED=2020/10/16 at 11:56:39
,PAGES=64
,TYPE=STD
,NAME=S0004039
,Book Name=M-884-CHINTAMANI TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,